तदन्तरेष्वस्त्यपदान्तरं[2] तद् द्वयं च लोकेष्वपि तारतम्यात् ॥१०५॥

---

[1] जिनाति—ह्रसति

[2] अपदान्तरम्—मध्यवर्ति

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तस्य प्रसारान्मनसोऽधिकश्चेत् प्रसार आयाति तदायमर्थः ।
अव्यक्ततां याति विलीयमानो, न ज्ञायते वा न निरुच्यते वा ॥१०६॥

भूमिमपेक्ष्याप्यधिकं घनत्वं कथंचिदायाति तदापि सोऽर्थः ।
अव्यक्ततां याति विलीयमानो न ज्ञायते वा न निरुच्यते वा ॥१०७॥

इत्थं तनुत्वं द्विविधं समीक्षे, तद्वचक्तमव्यक्तमिति प्रभेदात् ।
घनत्वमप्येवमिह द्विधेक्षते तद्वचक्तमव्यक्तमिति प्रभेदात् ॥१०८॥

भूम्यम्बुतेजोऽनिलवागसुभ्यः परं मनोऽव्यक्तमिहोभयं स्यात् ।
अव्यक्तमूर्ध्वं मनसस्तनुत्वं घनत्वमव्यक्तमुपर्यवन्याः ॥१०९॥

आरभ्य भूमौ मनसः परस्तादव्यक्तपर्य्यन्तमयः प्रसारः ।
प्रवर्त्तते तत्र मनोऽस्ति मध्ये निरुक्तमर्वागनिरुक्तमूर्ध्वम् ॥११०॥

मनःप्रभृत्युत्तरतश्च भूम्या अव्यक्तपर्य्यन्तमिदं घनत्वम् ।
प्रवर्त्तते, मध्यगता तु भूमी निरुक्तमर्वागनिरुक्तमूर्ध्वम् ॥१११॥

भूमीत उर्ध्वं न मतः प्रसारो, न चोर्ध्वमस्मान्मनसो घनत्वम् ।
भूमीमिमां तच्च मनोन्तरेण प्रसारसङ्कोचसमन्वयोऽस्ति ॥११२॥

भूमीमिमां तच्च मनोन्तरेण त्रयो विभागास्त्रिवृतः प्रकल्प्याः ।
त्रिकं घनिष्ठं, त्रिकमन्तरस्थं त्रिकं ततोऽणिष्ठमिति क्रमेण ॥११३॥

[1]तेजोम्बुभूमीरप आहुरेवं, वाग्-वायु-तेजांसि च वायुमाहुः ।
प्राणं मनःप्राणवचांसि चाहुः, वाक्तेजसोः सन्धिगयोर्द्विधात्वम् ॥११४॥

भूमीपरे स्यादधिकं घनत्वं मनःपरे स्यादधिकः प्रसारः ।
मध्यं समं चोभयतस्त्वसर्गौ पञ्चेत्थमस्मिन्नभवन् विभागाः ॥११५॥

अव्यक्तभागौ प्रलयस्वरूपं, मध्यास्त्रयः सृष्टिमया विभागाः ।
सान्ध्यैक्यतो मध्यगतास्तु सप्त प्रसृष्टयो व्याहृतयः प्रसिद्धाः ॥११६॥

अग्नेश्च सोमस्य पृथक्स्थयोः स्याद्रूपेऽणिमा, किन्तु तयोः प्रसर्गे ।
गुणाणुरेण्वादिकृताद्बहुत्वाद् भूमास्ति तस्मादिह भूतशब्दः ॥११७॥

तत्रापि भूमेश्च जलाच्च सृष्टौ विशिष्य भूम्नास्ति स भूतशब्दः ।
आपेक्षिकाणिम्नि पुनर्मनस्तः प्राणाच्च सृष्टेष्विह देवशब्दः ॥११८॥

वाग्वायुतेजस्सु तु भूतशब्दः स्याद्देवशब्दश्च समानभावात् ।
पञ्चैव भूतानि वदन्ति तस्माद्, वदन्ति पञ्चैव च दैवतानि ॥११९॥

न मानसप्राणकृतेषु भूतेष्वपि प्रयुङ्क्ते ननु भूतशब्दम् ।
नाप्येषु भौमेष्वपि देवशब्दं विवक्षया तद् व्यवहारकल्पम् ॥१२०॥

त्रयः समुद्राः सह संनिविष्टाः, प्राणाः सदा सायतनाः स्वतंत्राः ।
स्युर्वायवोऽनायतनाः स्वतंत्रा आपस्त्वकल्पायतनान्यतन्त्राः ॥१२१॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्राणाः स्युरुक्थानि तु देवसृष्टेरापः स्युरुक्थानि च भूतसृष्टेः ।
तत्रापि तत्रापि च वायुरुक्थं सृष्टौ हि ते वायुवशेन दृब्धे ॥१२२॥

॥ इति प्राक्सर्गः ॥

आवपनसर्गः (घनविरलभावहेतुः)

सोमस्तु बिन्दुं कमपीह केन्द्रं कृत्वा तमभ्येति च सर्वदिग्भ्यः ।
अग्निस्तु पर्य्येति कुतोपि केन्द्राद् बहिः समन्ताद् विसरन् विसारी ॥१२३॥

स्वतस्तु सोमस्य रजांसि सर्वाण्यग्नेरभावाद् घनतामुपेयुः ।
घनेऽग्निराविश्य विसार्य भूयो रजांसि तान्येव पृथक् तनोति ॥१२४॥

नानाणवो रेणुरभूदिहैकस्ते चाप्यनेकेऽभवदेकरेणुः ।
ते चाप्यनेकेऽभवदेकरेणुस्तदित्थमत्यन्तघनीभवन्ति ॥१२५॥

इत्थं घने क्वाप्यणवो भवन्ति यावन्त एतेऽग्निवशात् क्रमेण ।
प्रसारमागत्य पृथग् भवन्ति तद्विस्तृतं मण्डलमस्य रूपम् ।१२६॥

सोमस्य यावद्बलमस्ति तावत् स्कन्धात्मपिण्डः परिदृश्यतेऽन्तः ।
पिण्डप्रमाणस्य तु यावदग्नेर्बलं बहिस्तावदयं प्रसारः ॥१२७॥

प्रसाररूपायतनं तु सोऽग्निः प्रसार्यमाणानि रजांसि सोमः ।
सोमस्य यावन्ति भवन्त्यणूनि प्रसाररूपायतनं च तावत् ॥१२८॥

॥ इत्यावपनसर्गः ॥

विश्वसृट्सर्गः ।

यविष्ठः १

[1]तदग्निसोमान्वयक्लृप्तमूर्तिर्व्याप्तोऽभितोऽजायत कश्चिदर्थः ।
स जातवेदाः, नृमणाः, नृचक्षाः, यविष्ठ इत्याद्यभिधाभिरुक्तः ॥१२९॥

१	नृमणाः=नृचक्षाः=यविष्ठः=परमानन्दः=भूमा ॥			प्रथमकल्पे
२	प्रज्ञाः=	आनन्दः, ज्ञानम्, विज्ञानम् ।	चेतनाहेतुः । निमित्तहेतुः । मनोमयः ।	द्वितीय-कल्पे
	तेजांसि=	मातरिश्वा, विश्वकर्मा-विवस्वान् ।	चेष्टाहेतुः । असमवायि-हेतुः । प्राणमयः ।	
	विश्वानराः=	आदित्यः, विद्युत्, अङ्गिराः ।	अर्थहेतुः । समवायिहेतुः । अन्नमयः ।	
३	प्राज्ञः=	सर्वज्ञः=अन्तर्यामी=सत्यः	,, ,, ,,	तृतीय-कल्पे
	तैजसः=	हिरण्यगर्भः	,, ,, ,,	
	वैश्वानरः=	विराट्	,, ,, ,,	
४	भूताक्षितयः देवाक्षितयः	=लोकाः, यज्ञाः, वेदाः =सोमाः, ऋतवः, पृष्ठानि, सामानि, ग्रहाः, छन्दांसि, ऋषयः, प्राणाः, दिशः, संज्ञा ।		चतुर्थ-कल्पे

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अन्नं हि सोमोऽस्त्ययमग्निरन्नादन्नं यदात्तात्ति तदान्नमस्मिन् ।
हितं पृथङ् न व्यपदिश्यते तत्, किन्तूच्यतेऽन्नादयमेक एव ॥१३०॥

तदग्निसोमान्वयकल्पितरूपो द्वियोगजोऽन्योऽप्ययमग्निरेव ।
आख्यायते, तेन यविष्ठ एवं वैश्वानरोऽन्योपि तथाग्निरेव ॥१३१॥

यविष्ठभेदाः २

अथाग्निसोमान्वयतारतम्यात् त्रिधा यविष्ठस्य भवन्त्यवस्थाः ।
प्रज्ञा च, तेजश्च, तथैव विश्वानरश्च, ते चित्कृतिभूतरूपाः ॥१३२॥

वैश्वानराग्निः ३

पृथ्व्यन्तरिक्षं, द्युरिमानि विश्वान्यग्निश्च वायुश्च रविर्नरास्स्युः ।
विश्वेषु तेषु क्रमशः स्थितास्ते, विश्वानरास्तेन च ते प्रसिद्धाः ॥१३३॥

अत्राङ्गिरा अग्निरयैष वायुर्विद्युत् स गौरित्यभिधीयते च ।
सूर्योऽयमादित्य इति, त्रयाणामेषामनेके प्रभवन्ति भेदाः ॥१३४॥

अष्टौ स्युरादित्यगणा, अथैता गावः सहस्रप्रमिता भवन्ति ।
देवाश्च भूतानि च गोभ्य एवैर्कविशिनस्तेऽङ्गिरसः प्रतीताः ॥१३५॥

स्युर्द्वादशादित्यगणाश्च, रुद्रा एकादशाष्टौ वसवश्च गोभ्यः ।
इन्द्रो वषट्कार इमौ च देवौ देवास्त्रयस्त्रिंशदिमे प्रसिद्धाः ॥१३६॥

रुद्रेभ्य एते मरुतः प्रजातास्ते सप्तकाः सप्त मता अमीषाम् ।
कर्म्माणि रूपाणि विभेदनामान्यनूचिरे वेदमहर्षयः प्राक् ॥१३७॥

देवा अनन्ताः प्रभवन्ति तेषां विश्वानराख्याः, प्रभवास्त्रयस्ते ।
लोकत्रयाध्यक्षतया 'त' एतेष्वधिष्ठिता एव परत्र यान्ति ॥१३८॥

जागर्ति शेतेऽग्निरयं विधत्ते विश्वंशये जाग्रति हव्यवाही ।
स्थिरश्चरश्चाग्निमयं समीर्ते भूतानि, देवांश्च दधाति वायुः ॥१३९॥

आदत्त आदित्य इमानि भूतान्येषां रसांश्चैषु दधाति रूपम् ।
तेषां मिथः श्लेषवशेन वैश्वानरोऽग्निरुत्पद्यत इत्यवैमि ॥१४०॥

उक्थात्मना विश्वसितास्त एतेऽर्चन्ति त्रयोऽर्का अशितिं ग्रहीतुम् ।
आदित्य आदाय भुवोन्तरिक्षादन्नं, निजं विश्वमतो बिर्भात ॥१४१॥

दिवोऽन्तरिक्षाच्च नयन् स्वमन्नं स्वमंगिरास्तेन बिर्भात विश्वम् ।
विद्युच्च गोरूपतयोभयस्थानर्थान्नयन् सम्भरतेऽन्तरिक्षम् ॥१४२॥

दिव्यङ्गिरा संनयते क्षितिस्थान् दिव्यांस्तथादित्य इहानयेत ।
विद्युत्तु गोरूपतयान्तरिक्ष्यानर्थान्नयत्यत्र, परत्र चायम् ॥१४३॥

विश्वान्यभिव्याप्य नृणन्ति तस्माद् विश्वानरा नाम भवन्ति देवाः ।
तेऽन्योन्यघातेन बलैः सृजन्ति वैश्वानरं प्राह च वामदेव्यः ॥१४४॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[1]यं देवासोऽजनयन्ताग्नि यस्मिन्नाजुहवुर्भुवनानि विश्वा। (ऋ० १०।८८।९)
सोऽर्चिषा पृथिवीं द्यामुतेमामृजूयमानो अतपन्महित्वा ॥१४५॥

[2]स्तोमेन हि दिवि देवासोऽग्निमजीजनञ्छक्तिभी रोदसिप्राम्। (ऋ० १०।८८।१०)
तमू अकृण्वंस्त्रेधा भुवे कं स ओषधीः पचति विश्वरूपाः ॥१४६॥

[3]यज्जातवेदो भुवनस्य मूर्द्धन्नतिष्ठो अग्ने सह रोचनेन। (ऋ० १०।८८।५)
तं त्वाहेम मतिभिर्गी'भि'रुक्थैः, स यज्ञियो अभवो रोदसिप्राः ॥१४७॥

मूर्द्धन्वतो नाम तु वामदेव्यस्यर्षेर्वचो वेदयतेऽग्निजन्म।
त्रिधा तु सोऽग्निः समभूद्यथा तद् वत्सप्रिराहैष महर्षिरन्यः ॥१४८॥

[4]दिवस्परि प्रथमं जज्ञेऽअग्निरस्मद् द्वितीयं परि जातवेदाः। (ऋ० १०।४५।१)
तृतीयमप्सु नृमणाऽअजस्त्रमिन्धान एनं जरते स्वाधीः ॥१४९॥

[5]विद्मा तेऽअग्ने त्रेधा त्रयाणि, विद्मा ते धाम विभृता पुरुत्रा। (ऋ० १०।४५।२)
विद्मा ते नाम परमं गुहा यद् विद्मा तमुत्सं यत आजगन्थ ॥१५०॥

[6]समुद्रे त्वा नृमणा अप्स्वन्तर्नृचक्षा ईधे दिवो अग्न ऊधन्।
तृतीये त्वा रजसि तस्थिवांसमपामुपस्थे महिषा अवर्धन् ॥१५१॥(ऋ० १०।४५।३)

दिव्येष एकः पुरुषे, द्वितीयो यस्वान्तरीक्ष्यः, सहि पूरुषेऽभूत्।
तृतीय एषोऽप्सु यमिन्धतेऽस्यां, वैश्वानरः सर्वगतस्तदित्थम् ॥१५२॥

---

[1] देवासः यं अग्निं अजनयन्त, यस्मिन् विश्वा भुवनानि आजुहवुः। सः अर्चिषा पृथिवीं (अन्तरिक्षम्) द्यां उत इमां च ऋजूयमानः महित्वा अतपत्।

[2] देवासः शक्तिभिः रोदसिप्रां अग्निं दिवि स्तोमेन हि अजीजनन्। तं कं त्रेधा भुवे अकृण्वन्। स विश्वरूपा ओजधीः पचति।

[3] हे जातवेदः! अग्ने! यत् भुवनस्य मूर्धन् रोचनेन (आदित्येन) सह अतिष्ठः। तं त्वा मतिभिः गीर्भिः उक्थे अहेम (ऋ० १०।८८।५) स रोदसिप्राः यज्ञियोऽभवः।

[4] अग्निः प्रथमं दिवः परि जज्ञे। जातवेदाः द्वितीयं अस्मत् परि। नृमणाः तृतीयमप्सु (अन्तरिक्षे वैद्युतात्मना) एवं स्वाधीः अजस्रं इन्धानो जरते-स्तौति पृथिव्यन्तरिक्षद्युलोकेषु)

[5] हे अग्ने? ते त्रेधा (त्रिषु स्थानेषु त्रयाणि अग्निवाय्वादित्याख्यानि) विद्मा ते धाम पुरुत्रा विभृता विद्म। ते गुहा यत् परमं नाम विद्म। यत आजगन्थ, तमुत्सं विद्म।

[6] हे अग्ने? नृमणाः-समुद्रे अप्सु अन्तः त्वा, नृचक्षाः दिव ऊधन् ईधे। त्वां तृतीये रजसि तस्थिवांसं अपामुपस्थे महिषा अवर्धन्।
हे अग्ने? नृमणाः—त्वां समुद्रे अप्स्वन्तः वडवात्मना, नृचक्षाः—च दिव ऊधः स्थानीये त्वां इन्धनदानेन दीपितवान्। एवं तृतीये रजसि अन्तरिक्षे स्थितम् अपाम्मध्ये त्वां महिषा महान्तो मरुतः अवर्धन् अवर्धयन्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आदित्यवाय्वग्निरिति त्रिधाऽग्निः सोऽनेकधा विह्रियतेऽयमग्निः ।
यविष्ठ इत्यस्य निगूढनामा जगाम पूर्वं स इहाद्भ्य एव ॥१५३॥

अस्मिन् समुद्रेष्सु यथायमग्निर्दिवोष्सु चोधस्सु तथायमग्निः ।
स्थितं तृतीयेद्युरपामुपस्थे प्राणस्तमग्निं समवर्द्धयंश्च ॥१५४॥

ऋषिर्भरद्वाज उवाच बार्हस्पत्यो यथायं विमिमीत भूमौ ।
[४]रजांसि तद्वद्दिवि रोचनानि विश्वेष्वदब्धः परिपप्रथे च ॥१५५॥

वि यो रजांस्यमिमीत सुक्रतुर्वैश्वानरो वि दिवो रोचना कविः । (६।७।७)
परियो विश्वा भुवनानि पप्रथे ऽदब्धो गोपा अमृतस्य रक्षिता ॥१५६॥

[१]व्यस्तभ्नाद् रोदसी मित्रो अद्भुतोऽन्तर्वावदकृणोज्ज्योतिषातमः । (६।८।३)
वि चर्मणीव धिषणे अवर्त्तयद्वैश्वानरो विश्वमधत्त वृष्ण्यम् ॥१५७॥

[२]दिव्यन्तरिक्षे, भुवि, जन्तुदेहे, वैश्वानरो योगवशादुदेति ।
दिव्यन्तरीक्ष्येपि च शाकपूणिर्यास्कोपि तं पश्यति भौमयोगात् ॥१५८॥

यो वैद्युतोऽयं, किल वायुमाहुर्गोरूपतो यः क्रमते समन्तात् ।
स चानुपात्तः शरणेऽस्ति यावत् तावन्मतो मध्यमधर्मतोऽयम् ॥१५९॥

सोऽबिन्धनः कायशमं विधत्ते स चेदुपादीयत एष तर्हि ।
संपद्यते पार्थिव धर्मतोऽयं कायेन्धनस्तोयशमं करोति ॥१६०॥

इत्थं यदैवाङ्गिरसाऽन्तरीक्ष्यः संसृज्यते वैद्युतवायुरेषः ।
तदोभयप्रत्युपमर्द्धजन्मा वैश्वानरो नाम विजायतेऽग्निः ॥१६१॥

---

[१] सुक्रतुः यः रजांसि (लोकान्) वि अमिमीत (विविधं निर्मितवान्) वैश्वानरः कविः क्रान्तदर्शी दिवः-द्युलोकस्य-रोचना-नक्षत्राणि विविधं (निर्मितवान्) यः विश्वा भुवनानि परिपप्रथे । यः अदब्धः, गोपाः, अमृतस्य रक्षिता ।

[२] मित्रः रोदसी व्यस्तभ्नात् । अद्भुतः ज्योतिषा तमः अन्तर्वावत् (अन्तर्हितम्) अकृणोत् । धिषणे (धारयित्र्यौ द्यावापृथिव्यौ) चर्मणीव वि अवर्तयत् । वैश्वानरः विश्वम् वृष्ण्यम् (वीर्यम्) अधत्त-धत्ते धारयति च ।

[3] अयमेवाग्निर्वैश्वानर इति शाकपूणिः । विश्वानरावेते उत्तरे ज्योतिषी । वैश्वानरोऽयं यत्ताभ्यां जायते । कथं न्वयमेताभ्यां जायत इति । यत्र वैद्युतः शरणमभिहन्ति, यावदनुपातो भवति । मध्यमधर्मैव तावद्भवत्युदकेन्धनः शरीरोपशमनः । उपादीयमान एवायं संपद्यते उदकोपशमनः शरीरदीप्तिः । अथादित्यात् उदीचि प्रथमसमावृत आदित्ये कंसं वा मणिं वा परिमृज्य, प्रतिस्वरे यत्र शुष्कगोमयमसंस्पर्शयन् धारयति तत्र प्रदीप्यते, सोऽयमेव संपद्यते "(यास्कनिरुक्ते दैवतकाण्डे—७।२३।१०)"

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उदग्गतिप्रक्रमणे तु भास्वतः कंसं मणिं वा परिमृग्य धारयेत् ।
प्रतिस्वरे तस्य विशुष्कगोमयं चास्पर्शयंश्चेदथ दीप्यतेऽनलः ॥१६२॥

इत्थं यदादित्यत एष वैद्युतः संसृज्यते तर्हि समन्ततो रवेः ।
गोभिः प्रदीप्तैरपहन्यते तमः प्राहुर्वसिष्ठप्रमुखर्षयस्तथा ॥१६३॥

[1]तव त्रिधातु पृथिवी उत द्यौर्वैश्वानर व्रतमग्ने सचन्त ।
त्वं भासा रोदसी आततन्थाजस्रेण शोचिषा शोशुचानः ॥१६४॥
(७ मं. । ५ सू. । ४ मं.)

मैत्रिश्रुतौ पूर्वमुवाच शाकायन्यो महर्षिः खलु मैत्रिशिष्यः ।
इक्ष्वाकुवंश्याय बृहद्रथाय वैश्वानरोऽध्यात्मगतो यथाभूत् ॥१६५॥

अभ्याभवत्येष उपांशुरन्तर्यामं स चोपाँशुमजस्रवृत्या ।
तदन्तरादौष्ण्यमुदेति घर्षात् स एष वैश्वानरपूरुषोऽस्ति ॥१६६॥

प्राणोऽस्त्युपांशुस्तुतमभ्यपानोऽन्तर्याम एतौ च मिथोऽभियुक्तौ ।
व्यानं हि नोपांशु सवाश्मभूतं जहीत आस्मात् सवनात्तृतीयात् ॥१६७॥

अग्नेरुपांशुग्रह एष सोमोऽन्तर्यामनामग्रहदेवतास्ति ।
प्राणोऽग्निकर्माऽस्त्यथ सोमकर्माऽपानोऽस्ति, ताभ्यामिदमग्निजन्म ॥१६८॥

वैश्वानरोऽन्तःपुरुषेऽस्ति योग्निर्थेनाशितं पच्यत एतदन्नम् ।
तस्यैष घोषोऽस्त्यपिधाय कर्णौ शृणोति, यं नो शृणुते मुमूर्षुः ॥१६९॥

शीतो मरिष्यन् भवतीह जीवन्नुष्णः स वैश्वानर एव तस्मात् ।
अयं मनुष्यः पुरुषः परो वा यदस्ति विश्वं, तदयं, न चान्यः ॥१७०॥

४—तैजसाग्निः

ये तेजसामत्र समुच्चयेनाजायन्त ते केचन तैजसा स्युः ।
[2]श्वा मातरिश्वापि, च विश्वकर्मा, तथा विवस्वांश्च, मतास्त्रिधातौ ॥१७१॥

विवस्वता श्लिष्यति मातरिश्वा, वैश्वानरं चाहरतेऽन्तरीक्ष्यः ।
प्राणा अगृह्णन् दिवि चोपपन्नं, क्रमाद् भरद्वाज इति प्रवक्ति ॥१७२॥

[3]"अपामुपस्थे महिषा अगृभ्णन्, विशो राजानमुपतस्थुर्ऋग्मियम् ।
आ दूतो अग्निमभरद्विवस्वतो वैश्वानरं मातरिश्वा परावतः" ॥१७३॥
(६।८।४)

---

[1] हे वैश्वानर ? अग्ने ? ४ त्रिधातु, (तृतीयं धातु—अन्तरिक्षम्) पृथिवी, उत द्यौः, तव व्रतम् सचन्त—सेवन्ते । त्वम् अजस्रेण शोचिषा-प्रकाशेन शोशुचानः—दीप्यमानः भासा रोदसी आततन्थ । (विस्तारयसि) ।

[2] मातरि श्वानमेव श्वानमाहुः

[3] अपाम्—अन्तरिक्षस्य, उपस्थे—मध्ये, महिषाः—(महान्तो मरुतः) अगृभ्णन्—अगृह्णन् । विशः ऋग्मियम्—स्तुत्यम्, राजानं उपतस्थुः । दूतो मातरिश्वा परावतः-दूरात् विवस्वतः वैश्वानरम् अग्निम् आ अभरत्—इमं लोकं प्रत्याजहार ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५—प्राज्ञः

प्रज्ञाश्च ब्रह्मचो बहुधा प्रथन्ते, समुच्चयात् प्राज्ञ उदेति तासाम् ।
वैश्वानरस्तैजस, इत्थमन्यः प्राज्ञस्त, उक्थास्त्रय उद्बभूवुः ॥१७४॥

६—समष्टिव्यष्टिभेदाः

उक्थास्त्रयस्ते द्विविधाः समष्टिव्यष्टिप्रभेदात् प्रथिता विसृष्टौ ।
ते प्राज्ञ-वैश्वानर-तैजसाख्याः स्युर्व्यष्टयः पिण्डगता अनेकाः ॥१७५॥

सर्वज्ञ-वैराज-हिरण्यगर्भाः समष्टयस्तेऽण्डगता इहैके ।
अण्डप्रभेदात्तु भवन्ति भिन्नाः समष्टितो व्यष्टय उद्भवुः ॥१७६॥

विराट् च वैश्वानर इत्यभिन्नः, स तैजसो योऽस्ति हिरण्यगर्भः ।
प्राज्ञश्च सर्वज्ञ इहार्थ एकस्ते स्युस्त्रयोण्डे, त्रय एव पिण्डे ॥१७७॥

७—अक्षितय :

भूतानि भूताक्षितयः समस्ता, देवाश्च देवाक्षितयस्ततः स्युः ।
लोकाश्च यज्ञाश्च तथैषु वेदास्तिस्रस्तु भूताः क्षितयः प्रसिद्धाः ॥१७८॥

१ २ ३ ४ ५ ६ ७ ८ ९ १०
स्तोभर्तृपृष्ठग्रहसामसंज्ञा छन्दांस्यृषिप्राणदिशो दशैते ।
भवन्ति हि प्राणभृतो, ऽग्निवाय्वादित्येन्दुदिक्संज्ञकदेवतानाम् ॥१७९॥

८—सृष्टिद्वयी

दैवी च भौती द्विविधेह सृष्टिस्तदग्नि-सोमान्वयतारतम्यात् ।
देवाश्च पञ्चैव त एव तु द्यौः, पञ्चैव भूतानि च तानि पृथ्वी ॥८०॥

आदित्यवाय्वङ्गिरसस्त्रयस्ते,ऽग्नयोऽग्निवैशेष्यवशात् प्रसिद्धाः ।
चन्द्रो दिशश्चेति मतौ तु सोमौ सोमातिशय्यादिति पञ्च देवाः ॥८१॥

ये के च देवा अधिदैवतं वाऽधिभूतमध्यात्ममुपक्रमन्ते ।
एते 'हि' ते 'पञ्च' परे 'च' 'तेषां विकारतः केचन' संबभूवुः ॥८२॥

आकाशवाय्वग्नय उद्भवन्ति त्रयोऽग्निमात्रातिशयाद् द्युगम्याः ।
आपो, मृदो, द्वे त्विह सोममात्राधिक्यादधस्थ 'इति' भूतभेदाः ॥८३॥

भूतसर्गः ।

१—त्रैलोक्यम् ।

अग्नेश्च सोमस्य च यास्ति सृष्टिस्तया तयोरेक 'उदेति' भूमा ।
द्वयो रजांसीह बहूनि सृष्ट्वा, यद्रूपमायांति स एव भूमा ॥८४॥

भूमोवयः स्याद्भुवनं च भावश्चैतं 'हि' भावं प्रवदामि भावम् ।
यज्जन्मभावस्तत एष भावः कर्मैव तद्धचस्ति यदस्ति वस्तु ॥८५॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भूमा बहुत्वं बहुभी रजोभिर्ग्रन्थिः कृतो भूम्नि धृतोऽयमर्थः ।
जग्राह भूमानमिदं ततस्तद्भूतं विदुर्भूतमिदं समस्तम् ॥१८६॥

तच्चेह भूतं त्रिविधं समीक्षे, सूक्ष्मं, समं, स्थूलमिति प्रभेदात् ।
अग्नेर्बलीयस्त्ववशाद् विसारं रजांसि यान्तीति स सूक्ष्मभावः ॥१८७॥

संकोचमायान्ति रजांसि सोमाधिक्यात्, ततः स्थौल्यमुदेति भावे ।
मध्या स्थितिश्चेदुभयोः, समाने बले तदा मध्यमभाव इष्टः ॥१८८॥

त्रैभाव्यमित्थं रजसामिहाभूत् स्थविष्ठमन्तःस्थमणिष्ठमेषाम् ।
उपैत्यणीयस्त्वमपि स्थविष्ठं स्थविष्ठतामेति कदाप्यणिष्ठम् ॥१८९॥

प्राणन् प्रसारादयमन्यलोको, ऽपानन् पुनः सङ्कुचितोऽन्यलोकः ।
प्रसारसङ्कोचसमानयोगान्मध्या स्थितिश्चेदयमन्यलोकः ॥१९०॥

यद्वै स्थविष्ठं पृथिवी स लोको,ऽणिष्ठं द्युलोकोऽन्तरमन्तरिक्षम् ।
तान् भूर्भुवः स्वः प्रवदामि लोकानेता महाव्याहृतयः प्रसिद्धाः ॥१९१॥

प्राणानणिष्ठान् प्रवदामि तेषां, मध्यस्थितांस्तान् प्रवदामि वायून् ।
ब्रुवे स्थविष्ठांस्तु जलानि तद्वत्, त्रैलोक्यमित्थं प्रथमं वदामः ॥१९२॥

स्वतः पृथक्त्वात्तु रजःसमुद्रे लोकास्त्रयस्ते पृथगुद्बभूवुः ।
क्वचित् स्थविष्ठाः, क्वचिदप्यणिष्ठास्तेषां च मध्येऽन्तरिते अतिष्ठन् ॥१९३॥

४—त्रैलोक्यत्रिवृत्कारः

[1]प्राणश्च वायुश्च तथाप, इत्थं लोकास्त्रयो ये पृथगास्थितास्ते ।
प्राणादिगत्या व्यतिषज्य सर्वे परस्परेणैषु विकारमाधुः ॥१९४॥

प्राधान्यतस्तेन पृथक् प्रदेशावगाहिनां संस्रवतां त्रयाणाम् ।
प्रत्येकमेषामपि संबभूव त्रैभाव्यमुक्तक्रमसंनियोगात् ॥१९५॥

१

			पृ	अं	द्यौः		१
१	पृथ्वी	आपः	मृत्	जलम्	सोमः	भूः	भूतत्रैलोक्यम्
२	अन्तरिक्षम्	वायुः	अग्निः	वातः	आकाशः	भुवः	
३	द्यौः	प्राणः	वाक्	प्राणः	मनः	स्वः	
			भूः	भुवः	स्वः		

पृ.			अं.			द्यौः		
पृ.	अं.	द्यौः	पृ.	अं.	द्यौः	पृ.	अं.	द्यौः
मृत्	जलम्	सोमः	अग्निः	वातः	आकाशः	वाक्	प्राणः	मनः
भूः	भुवः	स्वः	भूः	भुवः	स्वः	भूः	भुवः	स्वः
भूः			भुवः			स्वः		

	शरीरात्मा			स्कम्भनात्मा			परमात्मा	
	मृत्	जलम्	सोमः	अग्निः	वायुः	आकाशः	वाक्	प्राणः	मनः
	पार्थिवात्मा			आन्तरीक्ष्यात्मा			दिव्यात्मा	

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५—उत्तमत्रिवृत्कारः ।

प्राणो हि सौक्ष्म्यं गमितो मनः स्यात्, स्थौल्यं गतो वागिति, रूपमेति ।
साधारणं तु प्रकृतिस्थितं तं प्राणं, तयोर्म्मध्यगतं वदामः ॥१९६॥

चैतन्यमाभासयते मनस्तत् प्राणो बलं यद् विधृतिप्रवृत्ती ।
वेदत्रयी वागपि मानुषी वागित्थं बभौ प्राणगता त्रिलोकी ॥१९७॥

यथा मनः सृष्टिकृते प्रकल्पते, सद्यस्तथा प्राण इहोपतिष्ठते ।
मनोऽनुगः प्राण उदेति यादृशो वाक् तादृशी तत्क्षणमत्र चेष्टते ॥१९८॥

प्राणेन साकं मनसा च वाक् सदा मिथोऽविना भूतमिदं त्रयं विदुः ।
मनो मतं द्यौः, पृथिवी च वागियं, प्राणोऽन्तरिक्षं, सह ते त्रयोऽभवन् ॥१९९॥

६—मध्यमत्रिवृत्कारः ।

वायुश्च सौक्ष्म्यं गमितो वियत् स्यात्, स्थौल्यं गतस्तैजसरूपमेति ।
साधारणं तु प्रकृतिस्थितं तं वायुं, तयोर्म्मध्यगतं वदामः ॥२००॥

इन्द्रः सरस्वानिति वाङ्मयो यस्तमेतमाकाश इति ब्रुवन्ति ।
वायुः प्रसिद्धस्त्वचि गृह्यते यो येनायमाकाश इहास्ति पूर्णः ॥२०१॥

द्वयोस्तु वाय्वोर्युतयोर्य एकोऽन्नादोऽन्यमन्नं कुरुते स तेजः ।
इत्थं परा वायुगता त्रिलोकी-न्द्रावायुतेजांसि सह स्थितानि ॥२०२॥

[1]द्यौरिन्द्र उक्तः, पृथिवी तु तेजः, सोऽग्निः, स वायुः पुनरन्तरिक्षम् ।
अग्निर्न वायुं व्यतिरिच्य, वायुर्नेन्द्रं कदाचिद् व्यतिरिच्य भाति ॥२०३॥

७—प्रथमत्रिवृत्कारः ।

आपस्तु सौक्ष्म्यं गमिता हि सोमः, स्थौल्यं गतास्ता यदि साऽत्र पृथ्वी ।
साधारणं तु प्रकृतिस्थितं यत् तदप्स्वरुपं ध्रियते यथावत् ॥२०३॥

सोमोऽपि तेजो य इहाग्नियुक्तः प्रद्योतते येन तमः क्षिणोति ।
सूर्य्याच्च चन्द्राच्च तथाग्निहेतेः सोमेन गावः परियान्ति दिक्षु ॥२०५॥

आपो वहन्त्यस्तु सरित्सु सिद्धाः पिबन्ति याः प्राणिजनास्तृषार्ताः ।
या शर्करा, याः सिकताश्मशिलायाः, क्षारा, हिरण्यानि, च साऽत्र पृथ्वी ॥२०६॥

द्यौः सोम उक्तः, पृथिवी तु पृथ्वी, या आप एता इदमन्तरिक्षम् ।
पृथ्वीयमद्भिर्विधृता कृता स्यात्, सोमेन चापो विधृताः कृताःस्युः ॥२०७॥

---

[1] यथाऽग्निगर्भा पृथिवी यथा द्यौरिन्द्रेण गर्भिणी इति श्रुतिः ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



चि. सं. ६ श्लो. सं. १९९ पृ. सं. १८

		पृथ्वी		अन्तरिक्षम्		द्यौः	
		पृ. | अं. | द्यौः		पृ. | अं. | द्यौः		पृ. | अं. | द्यौः	
		भूः | भुवः | स्वः		भूः | भुव. | स्वः		भूः | भुवः | स्वः	
		भूः		भुवः		स्वः	
		आपः		वायुः		प्राणः	
	अव्यक्तसोमः	अमृतम् | जलं | सोमः		अग्निः | वायुं | आकाशः		वाक् | प्राणः | मनः	अव्यक्तोऽग्निः
		स्थविष्ठम्		अन्तःस्थम्		अणिष्ठम्	
		शरीरम्		योजकसूत्रम्		आत्मा	
		माता		प्रजननः		पिता	
स्वः			तेजः		वाक्		मनः
भुवः		आपः		वायुः		प्राणः	
भूः	भूमिः		तेजः		वाक्		

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



सप्तलोकाः	पृथ्वी	जलम्	अग्निः	वायुः	वाक्	प्राणः	मनः	सप्तव्याहृतयः
	भूः	भुवः	स्वः	महः	जनः	तपः	सत्यम्	

चि० सं० ७ श्लो० २०८ पृ० सं० १९

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

८—त्रैलोक्यानुगमः

[1]पृथ्व्यश्च तिस्त्रोऽथ दिवश्च तिस्रस्त्रीण्यन्तरिक्षाणि यदित्थमाहुः ।
पृथक्, पृथग्, व्याहृतयस्त्रिधैताः स्युर्भूर्भुवःस्वःपदतोऽभिनेयाः ॥२०८॥

त्रैविध्यमेतद्भगवान् वसिष्ठो ऽनूचे तथा गार्त्समदश्च कूर्मः ।
ऊचे तथा दीर्घतमा महर्षिस्तथैतरेयप्रमुखाः परेऽपि ॥२०९॥

आत्मा तु वाक्प्राणमनोमयः स्यात् तेजोऽप्पृथिव्यास्तु शरीरमस्य ।
शरीरमात्मानमयं त्रिरूपः स्तभ्नाति सन्दर्भति वायुरन्तः ॥२१०॥

पिता स वाक्प्राणमनोमयः स्यात् तेजोऽप्पृथिव्यो जगतोऽस्य माता ।
तां मातरं, तं पितरं, च मध्यो बिभर्त्यसौ, दीर्घतमास्तथाह ॥२११॥

[2]"तिस्रो मातॄस्त्रीन्पितॄन् बिभ्रदेक ऊर्ध्वस्तस्थौ नेमव ग्लापयन्ति ।
मन्त्रयन्ते दिवो अमुष्य पृष्ठे विश्वविदं वाचमविश्वमिन्वाम् ॥२१२॥
[ऋ १।१६४। १०]

अचिकित्वाञ्चिकितुषश्चिदत्र कवीन्पृच्छामि विद्मने न विद्वान् ।
वि यस्तस्तम्भ षळिमा रजांस्यजस्य रूपे किमपि स्विदेकम् ॥२१३॥
(ऋ० १।१६४।६)

सप्त लोकाः ॥

यदुत्तमे संकुचितं प्रसारितं, यन्मध्यमे ते समलोकवर्तिनी ।
यन्मध्यमे संकुचितं प्रसारितं, यत् पश्चिमे ते समलोकवर्त्तिनी ॥२१४॥

स्वः पश्चिमे यत् तदु मध्यमे भूर्यन्मध्यमे स्वश्च तदुत्तमे भूः ।
इत्थं द्वयोरेकतया भवन्ति लोका इमे व्याहृतयोऽपि सप्त ॥२१५॥

ते भूर्भुवः स्वश्च महर्जनश्च तपश्च सत्यं च भवन्ति लोकाः ।
एष्वेव तिष्ठन्त्यखिलाः पदार्थास्तन्नास्ति यत् तानतिवर्त्य तिष्ठेत् ॥२१६॥

---

[1] 'तिस्रो द्यावो निहिता अन्तरस्मिन् तिस्रो भूमीरुपराः षड्विधानाः ॥ गृत्सो राजा वरुणश्चक्र एतं दिवि प्रेङ्खं हिरण्ययं शुभे कम् ॥ मं० ७ सू. ८७ । ऋ० ५ । इति वसिष्ठः ॥१॥ तिस्रोभूमीर्धारयन् त्रिरुँतद्यून् त्रीणि 'व्रता' विदथे अन्तरेषाम् । ऋतेनादित्या महिवो महित्वं तदर्य्यमन् 'वरुण मित्र' चारु ॥ मं२ । सू. २७ । ऋ० ८ । इति कूर्म्मो गार्त्समदः ॥२॥ त्रयो वा इमे त्रिवृतो लोकाः । ऐ० आ० २।१० ॥

[2] तिस्रः मातॄः—तेजोऽप्पृथिवीः, तदधिष्ठान् भूतान्, अधस्थान् लोकान्, त्रीन् पितॄन्—वाक्प्राणमनोमयान् त्रीन् उपर्य्युपरि लोकान् बिभ्रद्—धारयन् एकः ऊर्ध्वः तस्थौ । ईम्-एनं च न अवग्लापयन्ति । अमुष्य दिवः पृष्ठे विश्वविदम् विश्वभूताम् अधोऽधः त्रीन् लोकान्, परिणताम् अविश्वम् इन्वाम् उपर्युपरि विद्यमानान् लोकान् परिणताम् वाचम् मन्त्रयन्ते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मनांसि तेजांसि च वाच आपः प्राणाः पृथिव्योऽपि च वायवश्च ।
व्यक्त्या च जात्या च भवन्त्यनेकप्रकारतस्तानि विविच्य विद्यात् ॥२१७॥

प्राणास्तपः सत्यमदो मनांसि वाचो जनो वायुविधो महः स्यात् ।
स्वः सर्वतेजांसि, भुवस्तथापो भूरिष्यते सर्वविधाः पृथिव्यः ॥२१८॥

रूपैरमीभिर्जगदेतदेकं चराचरं व्याह्रियते समस्तम् ।
रजश्च तद् व्याह्रियते यदाभिस्तस्मादिमा व्याहृतयः प्रसिद्धाः ॥२१९॥

तेजस्त्रिधा स्वश्च भुवश्च भूश्च, वाक् च त्रिधा स्वश्च भुवश्च भूश्च ।
आपो द्विधा भूश्च भुवश्च तद्वत्, प्राणो द्विधा स्वश्च भुवश्च भाति ॥२२०॥

भूरेव पृथ्वी, भुवरेव वायुर्मनः स्वरेव त्रय एव लोकाः ।
[1]लोकास्त्वमी व्याहृतिभिः प्रकल्प्याः पृथ्व्यन्तरिक्षं द्युरिति क्रमेण ॥२२१॥

प्राणा इमे वायव आप इत्थं स्युरन्तरिक्षे 'व्यपदिश्यमानाः ।
आपो जघन्ये स्युरथोत्तमे स्युः प्राणास्तथा वायव एषु मध्ये ॥२२२॥

ये सप्त लोकाः प्रचरन्ति तेषां प्रत्येकजातिप्रविभक्तिरूपाः ।
अन्येऽप्यनेके प्रभवन्ति शाखा लोका न लोकेन विनास्ति वस्तु ॥२२३॥

यं वा यथा यत्र विलोकयामः, स कार्य्यपर्य्यायधृतोऽस्ति लोकः ।
छन्दांसि, वेदांश्च, दिशश्च, यज्ञान्, सहान्ववेतानि वदामि लोकम् ॥२२४॥

निवारयन्ती तिमिराणि चन्द्रिका या पौर्णमास्यां निशि भाति सा प्रगे ।
सूर्योदयान्न प्रतिभान्ति, तेंऽशवः सूर्य्यांशुलोके परिणम्य निर्ययुः ॥२२५॥

उद्दीप्तसूर्य्यार्चिषि नाग्निवर्चो विलोक्यते लोक्यत एव धूमः ।
तमीं तमिस्रामनुलोक्यतेऽर्चिर्न धूम इत्थं भवतीह कस्मात् ? ॥२२६॥

लोकान्तरत्वप्रतिपत्तिहेतोरेवेति, पश्यन्ति हि तैत्तिरीयाः ।
नक्षत्ररोचींष्यपि सूर्य्यलोकं गतानि, तस्मान्न दिवाऽवभान्ति ॥२२७॥

भूतात्रितयः ॥

रजांसि सप्तापि भुवः स्वरूपं, षड्भी रजोभिः प्रभवन्ति चापः ।
एकैकमेवं ह्रसतीति कृत्वा सर्वोत्तमं शुद्धमिदं मनोऽस्ति ॥२२८॥

रजांसि तानीह पृथग् बभूवुर्लोक्यन्त एतानि विविक्तभावात् ।
लोक्यन्त एष्वेव रजःप्रसूतास्तस्मात् त्रयः सप्त च तेऽत्र लोकाः ॥२२९॥

एभिस्तु लोकैः सह संनिविष्टैः संस्थात्रयी जायत इत्यवैमि ।
मनःकृता प्राणकृता च वाचाकृता च तिस्रोऽपि मिथोऽनुषक्ताः ॥२३०॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



सप्तलोक चित्रम्

चि० सं० ८ श्लो० सं० २२१ पृ० सं० २०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्याद्वेदसंस्था मनसा कृतास्मिन्, प्राणाश्रिता तत्र च यज्ञसंस्था।
वाचाकृतोदेति च लोकसंस्था, सर्वं त्रिसंस्थं भवतीह भूतम् ॥२३१॥

भूमिः स्थविष्ठाऽथ मनस्त्वणिष्ठं, तदन्तरेऽन्यानि रजांसि विद्यात्।
मनस्तु नभ्यं परितः श्रयन्ते, स्थूलोत्तराण्वेव रजांसि तानि ॥२३२॥

नानामनोरेणुसमन्वयेन प्राणस्य रेणुर्भवतीति मन्ये।
तेषां बहूनां च समन्वयेन वाग्रेणुरित्थं क्रमशः प्रविद्यात् ॥२३३॥

अप्पूर्वरूपा पृथिवीयमापोऽग्निपूर्वरूपा अथ वायुपूर्वः।
अग्निः स वाक् पूर्व उतैष वायुर्वाक् प्राणतोऽसौ मनसस्तदित्थम् ॥२३४॥

प्रदृश्यते या पृथिवीयमित्थं रूपाध्रुवं वेद्मि तदन्तरन्तः।
अपां च, वह्नेः, पवनस्य, वाचः, प्राणस्य, चित्तस्य, च तत्र रेणून् ॥२३५॥

भूरेणुरुत्सीदति दृश्यतेऽन्तस्त्वब्रेणुरस्यापचयऽग्निरेणुः।
तस्यात्यये मारुतरेणुरस्यात्यये तु वाग्रेणुरुदेति रूपात् ॥२३६॥

इत्थं कृता रेणुभिरेव रेणू रेण्वात्मभूता म्रियते न रेणुः।
प्रत्येकरेणोरणवः प्रगृह्यां भिन्नाधिरूढ़ाश्रयबन्धनत्वात् ॥२३७॥

पृथ्वीकपालान्तकृता हि लोका ब्रह्माण्डमेकं प्रवदामि लोकम्।
त्रिभिश्च लोकैरपि सप्तलोकैस्तमेकलोकं प्रतिवस्तु विद्यात् ॥२३८॥

नभ्यः स लोकस्तत आप एताः सूक्ष्मोत्तराणां रजसां क्रमोऽयम्।
संतिष्ठते तत्र गतो हि यस्मात्परं न विज्ञायत एष लोकः ॥२३९॥

नभौ स्थविष्ठा पृथिवी, ततोऽन्तेऽणिष्ठं मनस्तैर्ध्रियते रजोभिः।
यदस्य रूपं दृशि तत्परेषां गतं हि तद्वेदनहेतुरस्ति ॥२४०॥

तापः पृथिव्यां नियमेन दृष्टो नासंचरन् स व्ययमानमूर्त्तिः।
रेतांस्यपां जिन्वत्ति वा घनस्याकृत्वा द्रवीभावमुदेति नैषः ॥२४१॥

द्रव्याद् घनादेष बहिर्भवंश्चेत्स्यादन्तरिक्षे स हि तर्हि वायुः।
विलीयते यत्र तदस्य रूपं वियत् ततः प्राणमनःप्रपत्तिः ॥२४२॥

एधोऽस्ति पृथ्व्यां स यदा प्रदीप्यते, द्रवः स भूत्वैव तदेति हेतिताम्।
स ज्योतिरुत्सृज्य तु याति वायुतामूर्ध्वन्तु वाक्प्राणमनांसि मन्महे ॥२४३॥

मनःप्रभृत्युत्तरभूमसु क्रमाद् यथा यथा वर्द्धितमस्ति बन्धनम्।
उन्मुच्यते च क्रमतस्तथा तथा परा गतिः सा यदि सा भवेन्मनः ॥२४४॥

मनस्तु भूमित्वमुपैति संचरे, भूमिर्मनस्त्वं प्रतिसंचरक्रमात्।
इत्थं क्रिये द्वे भवतो निरन्तरं यतः स यज्ञः स्थितिरस्य वस्तुनः ॥२४५॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स लोक उक्तो यदि पीवरोत्तराः स्तराऽस वेदो यदि पीवरान्तराः ।
चित्तस्य वाचश्च य इत्थमुत्तरोत्तरिक्रमो यज्ञमिमं प्रचक्ष्महे ॥२४६॥

वेदस्य यज्ञस्य च लोकबन्धनं स्वरूपमुक्तं भुवनप्रसङ्गतः ।
विशिष्टरूपं तु तयोः प्रवक्ष्यते यत्स्यान्मनः प्राणनिबन्धनं परम् ॥२४७॥

संस्थाभिराभिर्ध्रियते यदेकं रूपं हि तद्भूतमिति प्रवच्मि ।
तत्पञ्चधा भूमवशाद्धि सौक्ष्म्यात् प्राणो न भूतैर्ध्रियते मनो वा ॥२४८॥

प्रज्ञामयप्राणमया हि देवा अन्नादिनस्ते पुनरन्नमेषाम् ।
मृदम्मयं स्यादितरेऽग्निवाऽप्वाकाशाद्विधात्तार उत स्युराद्याः ॥२४९॥

भुक्त्वात्मसात्कृत्य च योन्नमात्मस्वरूपमापादयतीह सोऽत्ता ।
प्रज्ञामयप्राणमयाश्च भुक्त्वा मृदप्त्वमायान्ति तथापि नान्नम् ॥२५०॥

प्रज्ञामयप्राणमयात्मरूपं द्विधा प्रतीमोऽमृतमर्त्यभेदात् ।
मर्त्येन भूतत्वमुपैति किन्तु प्रेक्षेऽमृतस्यास्य न विप्लवोऽस्ति ॥२५१॥

आत्मकल्पः

सोमोऽग्निरित्थं द्विविधं तु सर्वं रजोऽग्निरन्नादयमत्ति सोमम् ।
उभे अपीमे रजसी स्वशक्तिव्यूहप्रभेदाद् बहुधा प्रतीमः ॥२५२॥

एकैकशक्ति त्वणुमाहुरेतास्ताः शक्तयोऽनेकविधाः प्रथन्ते ।
द्वित्राभिराभिः क्व च पञ्चषाभिर्ये रेणवस्तेऽपि सहस्रशः स्युः ॥२५३॥

रजोऽन्नभुग् भिन्नबलं प्रतीयते किञ्चित् कनीयोऽधिकमत्ति किञ्चन ।
भुक्तः स सोमः परिणम्यते द्विधाऽमृतं च मर्त्यं च वपुस्तु तस्य तत् ॥२५४॥

यञ्चामृतं प्राणमयं तमग्निं मर्त्यं विदुर्भूतमयं तु सोमम् ।
तदग्निसोमद्वयकल्पितमङ्गं नियम्य धत्ते तु रजोऽग्निरङ्गी ॥२५५॥

अङ्गानि सर्वाणि भवन्ति देहास्तद्वेह संघः पुनरेकदेहः ।
आत्मा न एते पृथगङ्गिनो ये सर्वाङ्गिधर्ता पुनरेक आत्मा ॥२५६॥

यथा वपुर्विस्तृतमस्ति तत् तथाऽऽत्मनोऽन्नभोगाय बलं प्रवर्द्धते ।
उत्काम्यतेऽनुक्षणमस्य तद्वपुस्तदन्नभोगेन पुनर्विधीयते ॥२५७॥

रेणुः प्रजेशोऽन्नगतिस्वभावो रजोऽग्निरुत्क्रम्य दिवं प्रयाति ।
शरीरनिष्ठं त्वमृतं तदानीं प्रजापतेः स्थानमलंकरोति ॥२५८॥

विरिच्यते यत्वमृतं तदेतच्चापूर्य्यते मर्त्यविभागभोगात् ।
मर्त्यं विरिक्तं पुनरन्नभोगात् संपद्यते योऽन्नरसः शरीरे ॥२५९॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रवर्त्ततं चक्रमिदं तु यावत् तावत् स देहोऽस्ति स तावदात्मा ।
व्युच्छिद्यते चक्रमिदं यदा हि तदा न देहो न तदायमात्मा ॥२६०॥

प्राणस्य चान्नस्य तथोर्ज एषां मिथोऽभिसंधानमिहास्ति यज्ञः ।
अन्योन्यभोगश्च दिवस्पृथिव्योर्यज्ञेन तद्विष्ण्यमिदं स आत्मा ॥२६१॥

देहात्मभेदाद् द्विविधं रजः स्याद् देहस्तु पिण्डो रजसा धृतात्मा ।
देहस्य योस्ति प्रभवः प्रतिष्ठा तं धर्ममात्मेति वदन्ति विज्ञाः ॥२६२॥

देहोस्ति भूतोपचयोऽथ तस्मिन् यो दिव्यधर्मोऽनुगतः स आत्मा ।
देहा इमेऽण्डस्थितमण्डलानि चित्प्राणवाचां घन एषु चात्मा ॥२६३॥

चित्प्राणवाचः सयुजः स्युरेतास्ताभिस्त्रिधाण्डदिपयन्ति ? मात्रा ।
प्रज्ञानमात्रा अथ प्राणमात्राः स्युर्भूतमात्रास्त इमे विकाराः ॥२६४॥

इत्थं द्विधैता अमृताश्च मर्त्या, मर्त्या हि मात्रा अमृतोत्थिताः स्युः ।
वाचं तु मर्त्यामृता प्रसूते न क्षीयते सा त्वमृता तथापि ॥२६५॥

मर्त्याऽमृतां वाचमनूद्भवन्ती पीवोल्बणा तां परिवेष्य धत्ते ।
मर्त्यास्वरूपेष्विह भूतशब्दस्ततपञ्चभूतप्रचयस्तु देहः ॥२६६॥

तदन्तरे वाक्त्वमृताऽमृतश्च प्राणोऽमृता चिच्च स एक आत्मा ।
आत्मा च देहश्च परस्परेणानुषक्तरूपे भवतः सदैव ॥२६७॥

आत्मा स मर्त्यप्रचयं तु देहं देही कदाचिद्विजहाति जीर्णम् ।
यावन्न वागस्त्यमृता स आत्मा न तां जहातीह कदाचिदात्मा ॥२६८॥

अणोः स्वरूपं त्विदमुक्तमेवं रेणुं तथास्कन्धमपि प्रविद्यात् ।
स्कन्धे च रेणावपि मर्त्यदेहस्यान्तःस्थ आत्मा धरते स्वदेहम् ॥२६९॥

स्कन्धे च रेणावपि वाच एताः प्राणाश्च ते तानि मनांसि चेति ।
अणुस्थितान्येव मिथोऽनुषज्य त्रैभाव्यमायान्ति स एक आत्मा ॥२७०॥

तदित्थमैकात्म्यमुदेति यावत् तावत्तु तस्यात्मन ऐकतन्त्र्यम् ।
प्राप्नोति संज्ञां प्रयुनक्ति चेष्टां तावत् प्रदेशे हि स एक आत्मा ॥२७१॥

एकात्मनि क्वापि भवन्ति नानात्मानः पृथक् तन्त्रधृदेकतन्त्रे ।
रथे च वृक्षे च मनुष्यदेहे तन्त्रैरनेकैः कृतमेकतन्त्रम् ॥२७२॥

नानाणुतन्त्रैः कृतमेकतन्त्रं स एक आत्मा भवतीह रेणुः ।
तद्रेणुतन्त्रैर्बहुभिर्यदेकं तन्त्रं स हि स्कन्ध इहैक आत्मा ॥२७३॥

स्कन्धैरनेकैः कृत एक आत्मा, स्कन्धः पुनः स्कन्ध उदेत्यमीभिः ।
तन्त्रेऽन्यतन्त्राण्यपि तत्र तन्त्राण्येवं प्रविद्यादिह चेष्टितार्थैः ॥२७४॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वृक्षं यमेकं प्रवदाम आत्मग्रामः स तस्मिन् बहवः स्युरेते ।
अन्यानि तन्त्राणि दलानि शाखा शाला प्रकाण्डो विटपी च सन्ति ॥२७५॥

प्रत्येकतन्त्रनुगं एक आत्मा प्रजापतिर्गर्भगतोऽस्ति देहे ।
स्यादस्य योनिः क्वचिदेकबिन्दुर्योनिः स यन्नाशत आत्मनाशः ॥२७६॥

प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा विजायते ।
तस्य योनिं परिपश्यन्ति धीरास्तस्मिन् ह तस्थुर्भुवनानि विश्वा ॥२७७॥

नाभिस्थितो रश्मिभिरेष सूत्रात्मना कृतैर्देहमिमं वृणोति ।
तस्मिन् हि तस्थुर्भुवनानि तस्य च्युतौ च्यवन्ते न पुनर्भवन्ति ॥२७८॥

नाभिप्रतिष्ठोऽस्ति स यावदात्मा भूतानि तावद्भुवनानि तत्र ।
तद्भाव्यमानं भुवनं वदामः स्वभूतदेहं विभवेत्स आत्मा ॥२७९॥

योनिश्च नाभिर्हृदयं त्रयस्ते शब्दाः समानार्थतया प्रयुक्ताः ।
इष्टस्य पिण्डस्य यदस्ति मध्यं तदात्मधिष्ण्यं हृदयं तदाहुः ॥२८०॥

अस्मिन् शरीरे हि शिरः प्रभागोऽप्युरःप्रभागोऽप्युदरप्रभागः ।
प्राज्ञात्मनस्तैजसकस्य वैश्वानरस्य चात्रोदययोनयः स्युः ॥२८१॥

द्विधात्ममात्रस्तु विभज्यते साऽग्नेयी च सौम्या च तयोस्तु सौम्यः ।
वैश्वानरेणैक्यमितोपि रूपादात्मा महान्नाम विभिद्यते सः ॥२८२॥

महान्नमात्मानमिहात ऊर्ध्वं वक्ष्यामि तद्धर्मविशेषहेतोः ।
आग्नेय आत्मा प्रथमं निरूप्यः सोऽदृष्टमूलोऽस्ति च दृष्टमूलः ॥२८३॥

अदृष्टमूलस्त्विह सूत्रमात्मा पृथग्विधस्तं परतः प्रवक्ष्ये ।
यो दृष्टमूलः प्रथमः प्रधानस्तमत्र तावत् प्रतिपादयामि ॥२८४॥

ज्योतिः परं सूर्य्यमिमां च पृथ्वी सिद्धा पृथक् पिण्डतयापि लोके ।
तम्पूरुषा भिन्नविधा भवन्ति ते प्राज्ञवैश्वानरतैजसाख्याः ॥२८५॥

वैश्वानरोयं पृथिवी समुत्थो यस्तैजसः सूर्यसमुत्थ एषः ।
ज्योतिःपरं यत् परमाण्डसंज्ञं प्राज्ञस्ततः संभवतीति मन्ये ॥२८६॥

प्राज्ञः परं ज्योतिष एष भूभितो वैश्वानरस्तैजस एष सूर्य्यतः ।
परिस्रुतोऽत्र धियते त एव तद्गन्धप्रमोके प्रयता परा गतिः ॥२८७॥

आग्नेय आत्मा प्रतिजीवमीक्ष्यते स एकशत्वं त्रिवृतः प्रतीयताम् ।
वैश्वानरं तैजस एव मंत्रसंप्राज्ञो यथा चक्षुरिदं त्रिवृत्कृतम् ॥२८८॥

वैश्वानरो वागिह नाम तैजसः प्राणो मनः प्राज्ञ इति त्रयः सह ।
एकोऽयमात्मा परमेश्वरे यथा तथेह जीवेऽशत उद्भवत्ययम् ॥२९०॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



पञ्चाण्डादर्शः (दर्पणम्)

चि० सं० ९ श्लो० सं० २९१ पृ० सं० २५

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अण्डानि पञ्च प्रथितानि भूतग्रामा हि तेषां प्रचयस्तु देहः ।
विश्वाभिधो यस्य स एष एकः सर्वस्त्वमाहुः परमेश्वरं तु ॥२९१॥

अग्निर्मूर्धाचक्षुषी चन्द्रसूर्यौ, दिशः श्रोत्रे, वाग्विवृत्ताश्च वेदाः ।
वायुः प्राणो, हृदयं विश्वमस्य, पद्भ्यां पृथिवी ह्येष सर्वभूतान्तरात्मा ॥२९२॥

स चिद्घनः प्राणघनः प्रतिष्ठितो यो विश्वमूर्तिः परमेश्वरो ध्रुवः ।
तदात्ममात्रामुपलभ्य सर्वतो भवन्ति जीवाः परमेश्वरे हिताः ॥२९३॥

ज्योतिःपरं तत्र मनःप्रधानं प्राणप्रधानोऽभवदेष सूर्य्यः ।
भूमिस्तथाऽजायत वाक्प्रधाना चन्द्रःपुनस्तत्र मनःप्रधानः ॥२९४॥

न यत्र वैषम्यमगुस्त्रयस्ते सूत्रं तदत्रैव समस्तभूतम् ।
विश्वानरा वाच इमा अमीषु प्राणास्तु तेजांसि मनांसि तु ज्ञाः ॥२९५॥

विश्वानराणाभितरेतरान्वयादात्मा तु वैश्वानर एक उद्भवेत् ।
स्यात् तेजसां तैजस एव तद्गतः प्रज्ञाघनः प्राज्ञ इति त्रयः सह ॥२९६॥

वैश्वानरः प्राज्ञ उतैष तैजसस्त्रिमूर्तिरात्माऽखिलविश्वमण्डलम् ।
प्राप्नोति भिन्नप्रभवस्तथांशतो व्याप्नोति जीवाखिलदेहमण्डलम् ॥२९७॥

वैश्वानरो जायत आदितोऽस्मिन् सोऽतस्थिरूपोऽस्थियुतं बिभर्ति ।
स पार्थिवः प्राण इहासृगात्मा तं दर्शितुं दीर्घतमा उवाच ॥२९८॥

[1]को ददर्श प्रथमं जायमानमस्थन्वन्तं यदनस्था बिभर्त्ति ।
भूम्या असुरसृगात्मा क्व स्वित् को विद्वांसमुपगात् प्रष्टुमेतत् ॥२९९॥
[१।१६४।४]

वैश्वानरस्यास्य शरीरगस्य प्राहुः परे पञ्चविधं प्रमाणम् ।
बालाग्रसूक्ष्मं, रजसः प्रमाणं, हृदग्रविद्योति, तिलप्रमाणम् ॥३००॥

[2]अङ्गुष्ठमात्रं हृदयावसेयं प्रादेशमात्रं प्रतितैजसेद्धम् ।
व्यामप्रमाणं तु शरीरमेतद्व्याप्नोति चालोमनखाग्रदेशम् ॥३०१॥

मैत्रिश्रुतौ मानचतुष्कमुक्तं तिलं प्रमाणं तु न वक्ति किन्तु ।
आदित्यवद्भाति हृदग्रदेशे तदुत्क्रमात् प्रैति वदन्ति धीराः ॥३०२॥

प्रवक्ष्यते यश्च विराट् परात्मा वैश्वानरं तं च वदन्त्यभेदात् ।
ततो हि भूतान्यभवन्निमानि सूर्य्येण चायं सपुगाह कुत्सः ॥३०३॥

---

[1] प्रथमं जायमानं—यत् अस्थन्वन्तम् अनस्थो बिभर्ति को ददर्श । कः जानीते । असृगात्मा भूम्या असुः क्वस्वित्, एतत् विद्वांसम् प्रष्टुम् कः उपगात् ?।

[2] शरीर-प्रादेशाङ्गुष्ठमात्रमणोरप्यणुं ध्यात्वा सः परमतां गच्छति । अङ्गुष्ठप्रादेश-शरीरमात्रं प्रदीपप्रतापवद् द्विस्त्रिधा हि ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[1]वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः । [१।९८।१]
इतो जातो विश्वमिदं विचष्टे वैश्वानरो यतते सूर्य्येण ॥३०४॥

विराट् स वैश्वानर एष पृथ्वीं द्यामन्तरिक्षं स्पृशतीव साकम् ।
विशेषतस्तं निरुवाच बार्हस्पत्यो भरद्वाज महर्षिराद्यः ॥३०५॥

*वि यो रजांस्यमिमीत सुक्रतुर्वैश्वानरो विदिवो रोचना कविः ।
परि यो विश्वा भुवनानि पप्रथेऽदब्धो गोपा अमृतस्य रक्षिता ॥३०६॥

स जायमानः परमे व्योमनि व्रतान्यग्निर्व्रतपा अरक्षत । [६।७।७]
व्यन्तरिक्षममिमीत सुक्रतुर्वैश्वानरो महिना नाकमस्पृशत् ॥३०७॥

†व्यस्तभ्नाद्रोदसी मित्रो अद्भुतोऽन्तर्वावदक्रृणोज्ज्योतिषा तमः । [६।८।३]
विचर्मणीव धिषणे अवर्तयद्वैश्वानरो विश्वमधत्त वृष्ण्यम् ॥३०८॥

महान् स वैश्वानर एव भूतात्मेति प्रसिद्धः स हि कर्म्मभोक्ता ।
क्षेत्रज्ञ आत्मा तु स तैजसो ज्ञः स कारयत्येव न कर्म्मभोक्ता ॥३०९॥

[2]भूतात्मनोऽव्यक्तमुखत्वहेतोः सोमत्वमग्नित्वमपीति मैत्रिः ।
यः षोडशी तत्र महत्यमूनि भूतानि पञ्चापि सहाविशन्ति ॥३१०॥

क्षेत्रज्ञरूपं निजगाद शाकायन्यो महर्षिर्मरुते नृपाय ।
[3]इक्ष्वाकुवंश्याय बृहद्रथाय मैत्रिश्रुतौ, तत्पठितं प्रविद्यात् ॥३११॥

वैश्वनरो यज्ञमयोऽयमेषां धत्ते वपुः स्कन्धमणूयनाहात् ।
न पुग्दलं किञ्चिदिहास्ति यस्मिन् वैश्वानरो नास्त्यणुसंघधर्त्ता ॥३१२॥

यस्तैजसः प्राण इहास्ति तेन प्रत्यङ्गमेषां परिवृद्धिमेति ।
बालो युवा स्यात्, तरुरङ्कुरः स्यात्, तनून्नतिः क्वापि विना न तेन ॥३१३॥

---

[1] वैश्वानरस्य-पार्थिवाग्नेः सुमतौ स्याम । हि यतः अभिश्रीः—दीप्तिमान् सः भुवनानां राजा-स्वामी । इतो जातः इदं विश्वम् विचष्टे व्यञ्जयति । एवं हि वैश्वानरः पार्थिवाग्निः सूर्येण यतते—संगच्छते : तथा च यास्कः—"अमुतोऽ मुष्य रश्मयः प्रादुर्भवन्ति, इतोऽस्यार्चिषः, तयोर्भासोः संसर्गं दृष्ट्वा एवमवक्ष्यत् ।"

[2] मैत्रि० उप० ६ प्र० "सोमसंज्ञोयं भूतात्माऽग्निसंज्ञोऽप्यव्यक्तमुख इति वचनात् पुरुषो ह्यव्यक्तमुखेन त्रिगुणं भुङ्क्ते"—इति ॥ तमो वा इदमग्र आसीदेकम् । तत्परे स्यात् । तत्परेणेरितं विषमत्वं प्रयाति । एतद्रूपं वै रजः । तद्रजः खल्वीरितं विषमत्वम् ।

[3] मैत्रि० उप० ५ प्र० वयाति, एतद्वै सत्वस्य रूपम् । तत्सत्वमेवेरितं रसः संप्राश्नवत् । सोंऽशोयं यश्चेतामात्रः प्रति पुरुषः क्षेत्रज्ञः संकल्पाध्यवसायाभिभावलिङ्गः···" इति ॥ चिदाभासः क्षेत्रज्ञ इत्युक्तं भवति ॥ नान्योऽतोस्ति द्रष्टा, नान्योऽतोस्ति श्रोता, नान्योऽतोस्ति मन्ता, नान्योतोऽस्ति विज्ञाता, एव त आत्माऽन्तर्यामि इति बृहदारण्य-कमपि क्षेत्रज्ञस्वरूपसंपादकं चिदात्मानमेवाह ॥ *† १४ पृष्ठे व्याख्यातम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



प्राज्ञः=अन्तर्यामी } क्षेत्रज्ञः परज्योतिः
तैजसः= =..... } चिदाभासः सूर्य्यः

व्यानः=तेजनः

महान्= =सत्वम् (पित्र्यः) } भूतात्मा चन्द्रः
वैश्वानरः=यज्ञः } कर्मात्मा पृथ्वी

पञ्चभिरवरात्मभिरेको जीवात्मा शरीरी

चि० सं० १० श्लो० सं० ३२५ पृ० सं० २७

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्राज्ञस्य योगात् करणान्यपि स्युर्यत्सेन्द्रियं चेतनमुच्यते तत् ।
एकं च वैकादश वेन्द्रियाणि प्रज्ञाविशेषादुदियन्ति देहे ॥३१४॥

वैश्वानरस्तैजस एष च ज्ञस्त्रयः समं चेतनगा भवन्ति ।
अप्रज्ञमेतद् द्वयमस्ति तेषु स्युः स्थावरास्तेऽन्तरिहास्ति संज्ञा ॥३१५॥

वैश्वानरोऽप्रज्ञमतैजसं चेदध्यास्त एकः स जडोऽस्ति धातुः ।
इत्थं त्रिधाऽभिद्यत वस्तुवर्गो देवत्रयानुक्रमतारतम्यात् ॥३१६॥

वैश्वानरेणैव जड़ा असंज्ञाः स्युः स्थावरास्तेन सतैजसेन ।
प्राज्ञेन ताभ्यां सह चेतनाः स्युः तद्योगतो भूतविसृष्टिरन्या ॥३१७॥

भूतानि वैश्वानरमात्रतः स्युर्लोहाश्ममृच्छार्करसैकतानि ।
त्वग् दारुसारच्छदवृन्तसस्य प्रसूनरूपाणि तु तैजसात् स्युः ॥३१८॥

प्राज्ञप्रभावात्तु भवन्ति भूतान्यसृङ्नखास्थीन्द्रियसंविधानि ।
ते प्राज्ञवैश्वानरतैजसाख्या आत्मान एषां क्रमतो भवन्ति ॥३१९॥

इराभवेदन्नरसः शरीरं हिरण्मयं तद्भवतीह सर्वम् ।
भूगर्भतोऽग्निः प्रतिपद्य तस्मिन् संवत्सरेण प्रतितिष्ठतीह ॥३२०॥
(ऐ० आ० आ० १ ख० ३)

प्रपद्य देहं प्रपदद्वयेनोदसर्पदूर्ध्वं भवतस्तदूरू ।
अथोदरं तत् तदुरोऽभवच्च क्रमादुरुब्रह्म तदित्थमासीत् ॥३२१॥
(ऐ० आ० १ आ० ४ ख०)

तत्रोदरं ब्रह्म तु शार्व्वराक्ष्या उपासनेऽथारुणयो हृदे तत् ।
ब्रह्मैव मन्ये हृदयोदरे ते स्थित्वेहवे वेष्टचखिलं शरीरम् ॥३२२॥

परात्मनेन्द्रेण समन्वितत्वादैन्द्रं तदात्मत्रयमाहुराद्याः ।
सर्वे च देवा इह संनिविष्टास्तत्कर्मजातं बृहदुक्थ ऊचे ॥३२३॥

सर्वेऽपि देवा रविरश्मिनिष्ठा इहोपसीदन्ति यथा यथा ते ।
स्वकर्म्म कुर्वन्ति, तमेतमर्थं सुविस्तृतत्वादिह नोद्धरामि ॥३२४॥

परात्मानस्त्रयः ।

अध्यात्ममात्मत्रयमेतदाभात्यऽध्यण्डमेषां पुनरन्यसंज्ञाः ।
[1]ये प्राज्ञ-वैश्वानर-तैजसास्तेऽन्तर्यामि-वैराज-हिरण्यगर्भाः ॥३२५॥

वैश्वानरो यः स विराडिहोक्तो, यस्तैजसः, सोऽत्र हिरण्यगर्भः ।
प्राज्ञस्तु सर्वज्ञ इहास्ति, सोन्तर्यामी स मुख्योऽस्ति जगन्नियन्ता ॥३२६॥

अन्नं विराडन्नमयी हि पृथ्वी, सर्वा पृथिव्यस्ति विराट् स पूषा ।
अन्नाद्विशेषाद्विविधं स राजत्युद्भूयमानोप्यखिलो विराट् स्यात् ॥३२७॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्राणं तमग्निं तु हिरण्यमाहुर्हिरण्मयोऽस्मिन् पुरुषोऽस्ति सूर्य्ये ।
स यावता स्वेन विभाति भासा तावानयं नाम हिरण्यगर्भः ॥३२८॥

परो दिवो ज्योतिरदः परं यन्मनोमयं सत्यमुपासते तत् ।
अन्तर्नियन्तास्ति हि तेन सोऽन्तर्यामी स विज्ञानमयः प्रसिद्धः ॥३२९॥

लोकेषु विज्ञानमुपैति यस्मादिहोपजीवन्ति यदीयमात्राम् ।
विज्ञानयोनिः सरजश्च योऽन्तर्यामी स विज्ञानमयो निगूढः ॥३३०॥

सर्वज्ञ आराजति सर्वविद्यो यस्यास्ति हि ज्ञानमयं तपोऽग्र्यम् ।
तस्मादिदं ब्रह्म च नामरूपं प्रजायतेऽन्नं च समस्तमेतत् ॥३३१॥

बलं यतः संचरतीह लोके यस्योपजीवन्ति जना हि मात्राम् ।
हिरण्यगर्भः स हि कर्मयोनी रजश्च यः प्राणधनोऽस्ति सूर्य्यः ॥३३२॥

[२]हिरण्यगर्भः समवर्ततात्रे भूतस्य, जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम् ॥३३३॥
[ऋ० १०।१२१।१]

प्रकाशयेज्ज्ञानमिदं यमर्थं बलाश्रये यत्र भवेत् क्रियेयम् ।
पूषा द्वयोः पोषण एष सोऽर्थः प्रभुर्भवद्भूतभविष्यतां सः ॥३३४॥

परमेश्वरस्वरूपम् ।

मनोमयः, प्राणमयस्तदित्थं तृतीय एषोऽन्नमयस्त्रयस्ते ।
ज्ञानक्रियार्थप्रभवास्त्रिभिस्तैः सहस्थितैर्विश्वमिदं कृतं स्यात् ॥३३५॥

रजस्सु त्रिष्वेषु स भूतभावनो वैश्वानरो यश्च विराडिहोदितः ।
हिरण्यगर्भस्तु स सर्वशक्तिमान् त्रयं यदेकत्र स ईश्वरः परः ॥३३६॥

ये व्यष्टिभूताः पृथगत्र दृष्टास्तेषां समष्ट्यात्मतया प्रतीताः ।
देवास्त्रयस्ते विभवोऽण्डमध्ये योऽध्यक्ष एषामयमीश्वरोऽस्ति ॥३३७॥

स्वभावमेके कवयो वदन्ति, कालं तथान्ये, परिमुह्यमानाः ।
देवस्यैष महिमा तु लोके येनेदं भ्राम्यते ब्रह्म चक्रम् ॥३३८॥

शारीरको मध्यम एष देवः स ईश्वरो विश्वमयस्वरूपः ।
सृजत्यवत्यत्ति च सोऽन्तरिक्षे द्यावापृथिव्योश्च यथात्र देहे ॥३३९॥

यथा शरीरे निखिलेन्द्रियाणि ये मृत्युभावा अमृताश्च भावाः ।
ते वाङ्मनःप्राणमयात्ममूला भवन्ति, तिष्ठन्ति, विपर्य्ययन्ते ॥३४०॥

प्राणो हि वायुर्मन एष सूर्य्यो, वागग्निरेतन्मय एष आत्मा ।
वैश्वानरोऽग्निः स हिरण्यगर्भो वायुः स सर्वज्ञ उदेति सूर्य्यः ॥३४१॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वैश्वानरं रक्षकमग्निमाहुर्नारायणं विष्णुमुपासते तम् ।
हिरण्यगर्भो जगतो विधाता ब्रह्मा स वायुः प्रथते त्रिलोक्याम् ॥३४२॥

सर्वज्ञ एतत् सकलं विचष्टे स शंकरः शान्तिसमृद्धरूपः ।
समष्टिरूपास्त्रय एत एषां या व्यष्टयस्ताभिरिमेऽत्र जीवाः ॥३४३॥

विराट् च वैश्वानर इत्यभिन्नाः स तैजसो योऽस्ति हिरण्यगर्भः ।
प्राज्ञश्च सर्वज्ञ इहार्थ एकस्ते च त्रयोऽण्डे त्रय एव पिण्डे ॥३४४॥

दिव्यन्तरिक्षे निहिताः पृथिव्यां विश्वं यथाण्डं त इमे विशन्ति ।
शिरस्यथो वक्षसि वोदरे वा स्थित्वा तथा विश्ववपुर्विशन्ति ॥३४५॥

यथोदरोत्थो निखिलं शरीरं व्याप्नोति वैश्वानर एवमण्डे ।
पृथ्वीसमुत्थो निखिलां त्रिलोकीं व्याप्नोति भूमौ दिवि सोऽन्तरिक्षे ॥३४६॥

हृदुत्थितस्तैजस वायुरेतद्व्याप्नोति चापादशिरःशरीरम् ।
[1]तथान्तरिक्षोत्थहिरण्यगर्भो व्याप्नोति चाद्यामयभा च पृथ्वीम् ॥३४७॥

विज्ञानमात्मा शिरशि प्ररूढो व्याप्नोति चालोमनखाग्रदेशान् ।
सर्वज्ञ आत्मा स तथैव सूर्य्ये प्रादुर्भवंश्चेतयते त्रिलोकीम् ॥३४८॥

यथा शरीरी पुरुषः स एको वैश्वानरेणापि, च तैजसेन, ।
प्राज्ञेन, संपन्नतमस्तथायं विभाति संपन्नतमस्त्रिभिस्तैः ॥३४९॥

स एष देवस्त्रिभिरेकमूर्तिर्वैश्वानरोऽसौ स हिरण्यगर्भः ।
स एव सर्वज्ञ इति प्रसिद्धस्त्र्यात्मा त्रिलोकीपतिरीश्वरोऽयम् ॥३५०॥

मनोमयः प्राणमयः स आत्मा स वाङ्मयो यः परमेश्वरोऽयम् ।
ता एव मात्रास्तत एत्यभिन्नं स्वयज्ञधिष्ण्यं दधते स जीवः ॥३५१॥

जीवात्मसु परात्मानुग्रहः ।

त्रयोपि जीवात्मतया मतास्ते परात्मनोऽनुग्रहमाप्नुवन्ति ।
दिव्यानि वाक्प्राणमनांसि नित्यं रसान् प्रवर्षन्ति निजानमीषु ॥३५२॥

शरीरतो बन्धमुपेत्य तस्मिन् बद्धः स्थितो यः स हि जीव आत्मा ।
पर्य्याप्तवृत्तोऽपि न योऽत्र बद्धो व्योम्नि स्थितोऽसौ परमे परात्मा ॥३५३॥

वैश्वानरो यावति तावती वाक् प्राणोऽयमल्लोत्यभितैजसं तम् ।
प्राज्ञे प्रकाशं लभते मनोऽस्मिन्नात्मा हि वाक्प्राणमनांसि तेषाम् ॥३५४॥

जडेषु वृक्षादिषु चायमात्मा न पूर्णरूपो मनसोऽप्रबोधात् ।
ज्योतींषि तु त्रीण्यपि चेतनेषु प्रभान्ति तस्मादिह पूर्ण आत्मा ॥३५५॥

---

[1] आपो द्यां माला पृथिवीमिति श्रुत्तिः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शारीर आत्मास्ति ततस्त्रिकेतनः स वाङ्मयः, प्राणमयो मनोमयः ।
बाह्या वृतिर्वागियमेतदन्तरे प्राणो, मनस्तस्य तथान्तरान्तरे ॥३५६॥

व्याप्य स्थितं प्राणमिमां च वाचं मनः समन्तादखिलान्तरस्थम् ।
प्राणोपि वाचञ्च मनश्च धत्ते, प्राणो मनश्चाव्रियते तु वाचा ॥३५७॥

त्रिभ्यः प्ररोहाः पृथगुद्भवन्ति हि त्रयस्त्रिमूलाः सुदृढाः पृथक् स्थिताः ।
ज्योतिर्मयोऽसौ मनसः प्रधारणः प्राणस्य वाचस्तु तमोमयो मनः ॥३५८॥

स्युः प्राज्ञमात्राः मनसः प्ररोहा वाचः प्ररोहा इह भूतमात्राः ।
प्राणप्ररोहा इह प्राणमात्रास्तिस्रोऽपि मात्राः पुरुषः शरीरी ॥३५९॥

याः प्राज्ञमात्रा अथ भूतमात्रा, याः प्राणमात्राः सह ताः समस्ताः ।
रूपं यदेकं समवेत्य कुर्य्युस्तच्चेतनं प्राणिशरीरमेतत् ॥३६०॥

अग्निश्च सोमश्च मनस्युपाहितौ प्राणे पृथग् वाचि पृथक् च तिष्ठतः ।
अग्निस्त्रिलोकान्वयतस्त्रिधाऽभवत् सोमो द्विधा चन्द्रदिगन्वयादभूत ॥३६१॥

प्रज्ञास्ततः पञ्च मनःप्ररोहणा वाक्प्राणचक्षूंषि मनःश्रुती अपि ।
अग्निश्च वायुश्च रविश्च चन्द्रमा दिशश्च ताः प्राणसमा हि देवताः ॥३६२॥

रूपं स्पृशिः शब्द इति त्रयं, रसो गन्धश्च वाक् काण्डगभूतसंग्रहः ।
भूतानि सूक्ष्माणि महान्ति भौतिकान्येतच्छरीराण्यभवंस्ततः पुनः ॥३६३॥

क्रमेण लोमत्वगसृक् च मांसं मेदोऽस्थिमज्जान्तरिहास्ति रेतः ।
अष्टस्तरं सिध्यति यच्छरीरं वैश्वानरस्तस्य विधानकर्त्ता ॥३६४॥

हृत्स्फूर्तिनाडीगतयो रसासृक्प्रसारणं श्वासगतिर्निमेषाः ।
क्षुधा पिपासामलमूत्रनिद्रागर्भस्थितिर्जन्म च तैजसास्युः ॥३६५॥

रसा नवोत्साहरतिप्रकारा य हर्षशोकादिकृता विकाराः ।
दृष्टानुमानादिमतिप्रसाराः प्रज्ञानुसाराः स्युरिमेऽवताराः ॥३६६॥

प्रधान्यतस्त्विवत्थमुशन्ति, किन्तु त्रिषु त्रयाणामुपयोगितास्ति ।
प्रज्ञा यथा यस्य तथास्य कामास्तथास्य चेष्टाश्च तथाङ्गकल्पितिः ॥३६७॥

त्रिमण्डलं तेन शरीरमेतच्छिरस्तथोरसश्च, तथोदरं च ।
त्रयोपि चालोमनखाग्रदेशं कायं समस्तं विभवन्ति साम्यात् ॥३६८॥

कथं शरीरस्य विभक्तयस्ता बभूवुरुच्चावचरूपसंस्थाः ।
तदेतदन्यत्र विशिष्य विद्याच्छरीरनिर्माणविचारशास्त्रे ॥३६९॥

जीवोऽयमात्माऽस्त्यवरस्त्रिमूर्त्तिस्तेनैक्यमाप्नोति परस्त्रिमूर्तिः ।
इन्द्रेण सोमेन कृते शरीरे मनोऽविशद्दीर्घतमास्तथाह ॥३७०॥

[१।१६४।१८]

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[1]अवः परेण पितरं यो अस्यानुवेद पर एनाऽवरेण ।
कवीयमानः क इह प्रवोचद् देवं मनः कुतो अधि प्रजातम् ॥३७१॥

[2]ये अर्वाञ्चास्तांनुपरा च आहुर्येपराञ्चास्तां उ अर्वाच आहुः ।
इन्द्रश्च या चक्रथुः सोम तानि धुरा न युक्ता रजसो वहन्ति ॥३७२॥
[१।११६४।१९]

[3]द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्ति, अनश्नन्नन्यो अभिचाकशीति ॥३७३॥
[१।१६४।२०]

[4]यत्रासुपर्णा अमृतस्य भागमनिमेषं विदथाभिस्वरन्ति ।
इनो विश्वस्य भुवनस्य गोपाः समा धीरः पाकमत्राविवेश ॥३७४॥
[१।१६४।२१]

[5]यस्मिन् वृक्षे मध्वदः सुपर्णा निविशन्ते सुवते चाधि विश्वे ।
तस्येदाहुः पिप्पलं स्वाद्वग्रे तन्नोन्नशद् यः पितरं न वेद ॥३७५॥
[१।१६४।२२]

अजश्च पिण्डश्च महान् द्विधायं प्रजापतिः कोपि महानजः स्यात् । (ऐ.आ.पृ.१४८)
पिण्ये महत्येव महानजोऽयं संसृज्य रूपं कुरुते तदेकम् ॥३७६॥

---

[1] यः अवः अस्य पितरम् परेण अनुवेद । परः एना अवरेण, देवं मनः कुतः अधि प्रजातम्, कवीयमानः कः इह प्रवोचत् । यः अवःस्थितम् अस्य लोकस्य पितरम्-पालकम् पार्थिवाग्निम्, परेण आदित्येन सह, एवं परमादित्यम् एनेन अग्निना सह अनुवेद । उभयोः परस्परसम्बन्धमैक्यं च जानाति ।

[2] ये अर्वाञ्चः ताम् उ पराचः आहुः । ये पराञ्चः, तान् उ अर्वाञ्च आहुः । हे सोम ? इन्द्रः च या चक्रथुः, तानि रजसः धुरा न युक्ता वहन्ति । सूर्यसोमयोः चक्रे वर्तमानाः ये रश्मयः ग्रहाः वा अधोमुखाः, तान् ऊर्ध्वमुखान्, ये च ऊर्ध्वमुखास्तान् अधोमुखान् आहुः । हे सोम त्वं च सूर्यश्च यानि मण्डलपरिभ्रमणानि चक्रथुः, तानि लोकं तथैव वहन्ति यथा धुरियुक्ता अश्वादयः धुरं वहन्ति ।

[3] द्वावेव—सूर्यसोमौ (पूर्वप्रकृतत्वात्) सुपर्णौ-सयुजौ-सहयोगिनौ, सखायौ-मित्रवत् स्थितौ, समानं वृक्षम्-अमुम् त्रिलोकीम्, परिष्वक्तौ । एतयोः अन्यः सोमः स्वादु पिप्पलमत्ति, अन्नाद इत्यर्थः । अन्यः अनश्नन् अभितः चाकशीति-पश्यति । केचन मन्त्रमिमं जीवात्मपरमात्मपरतया व्याख्यान्ति ।

[4] यत्र आदित्यमण्डले सुपर्णाः अमृतस्य-उदकस्य भागमंशम् अनिमिषम् अनवरतम् विदथा- अभितः स्वरन्ति प्रापयन्ति । यश्च विश्वस्य भुवनस्य-अस्याः त्रिलोक्याः, गोपाः, स धीरः मां पाकम्- अत्रास्मिन्मण्डले विवेश-विष्टः ।

[5] यस्मिन् पूर्वोक्ते त्रिलोकीरूपे वृक्षे, मध्वदः-उदवात्तारः सुपर्याः निविशन्ते, अथ च अधिविश्वे-सम्पूर्णे त्रिलोकीमण्डले सुवते- च । यः पितरं न वेद तत् नोनशत्- न प्राप्नोति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स षोडशी चन्द्रवदेव चास्मिन् स्थिताः कलाः षोडश, ता अमुष्य ।
विभक्तयस्ताभिरयं प्रपन्नो, नातः परं रूपममुष्य वीक्ष्ये ॥२७७॥

प्राणोऽभवत् प्राणत एव श्रद्धा, भूतानि पञ्चेन्द्रियमानसं च ।
अन्नं ततस्तूर्क् च तपश्च मन्त्राः कर्माथलोका अथ तेषु नाम ॥३७८॥

इमाः कलाः षोडश यत्र दृष्टा द्रष्टा स आत्मा पुरुषोऽवधेयः ।
प्रतिष्ठितास्तत्पुरुषे कलास्ता, रथस्य नाभौ निहिता यथाराः ॥३७९॥

यथासमुद्रायणनद्य एताः समुद्रमित्वा निजनामरूपे ।
हित्वा समुद्रात् प्रभवन्त्यभिन्नास्तथा कलास्ताः पुरुषादभिन्नाः ॥३८०॥

महत्त्रिधा सत्त्वरजस्तमोभिर्ज्योतिर्विशेषान्वयतारतम्यात् ।
क्षेत्रज्ञसंज्ञं मन एव पञ्च ज्योतिर्मयं ज्योतिरिहाभ्युपैति ॥३८१॥

सत्त्वं यथा राजति पूर्णचन्द्रो दिवेव चन्द्रो मलिनं तु सत्त्वम् ।
रजस्तु दर्शेन्दुरिवाष्टमीन्दुरजस्तदित्थं त्रिवृत्तं महत्तत् ॥३८२॥

कामाभिभूतं मलिनं मनः स्यादनाकुलं तेन मनोऽस्ति शुद्धम् ।
कामः स्वरूपं मनसोऽस्ति किन्तु स्याद्वासना चेन्मनसोऽस्त्यशुद्धिः ॥३८३॥
[मै० उ० ६ प्र०]

महन्मनः संक्रमणान्मनः स्यात्, तत्प्राणिसत्त्वं स हि जीव आत्मा ।
सत्वं महच्चेति न भिद्यतेऽर्थः, सत्वस्य दोषौ तु रजस्तमश्च ॥३८४॥

महत्स्वरूपेण तदप्रकाशं ज्योतिर्न संक्रामति चेत्तमस्तत् ।
छायामयं तद्धि रजः प्रकाशाप्रकाशसंयोगवशात् प्रसिद्धम् ॥३८५॥

सत्त्वं मनोऽहंकुरुतेऽहमस्मि, मलीमसादर्थगतोऽवभासः ।
रजः क्रियाऽन्तःकरणस्थवृत्तिस्तमस्तु विज्ञानगतार्थरूपम् ॥३८६॥

ज्योतींषि सर्वाण्यपि सत्त्वरूपं,क्रियास्तु सर्वा रजसोऽस्ति रूपम् ।
अर्थाः समस्तास्तमसोऽस्य रूपं सर्वं हि तत्तेन महत् तदुक्तम् ॥३८७॥

विशिष्टसत्त्वाः प्रभवन्ति देवा, अशुद्धसत्वा इह चेतनाः स्युः ।
तमोमयाः स्थावरगा महान्तः क्रिया अमीषां परिवर्तनानि ॥३८८॥

मनुष्य-दैवासुरपक्षि-रक्षो-गन्धर्व-गो-वाजि-गजादिभेदात् ।
सत्त्वान्यसंख्यानि विभिन्नरूपाण्याभान्ति सर्वाणि महान्ति तानि ॥३८९॥

सर्वासु योनिष्वपि मूर्तयो या भवन्ति तासां महदेव योनिः ।
क्षेत्रज्ञ आत्मा त्विह बीजदाता पितेति कृष्णः प्रतिपद्य वक्ति ॥३९०॥

अस्मिन् शरीरे प्रतियोनि सोऽयं महान् विभिन्नां तु मितिं दधाति ।
अङ्गुष्ठमात्रः स यथा नराणां तथेतरेषामपि सोऽनुकल्प्यः ॥३९१॥

यन्मुष्टिमात्रं ब्रुवते प्रमाणं भूतात्मनस्तन्महतो न तत्स्यात् ।
प्रादेशमात्रो हि तदर्धमात्रे वैश्वानरस्तिष्ठति भूतपिण्डे ॥३९२॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रमाणमस्मिन्महति त्रिधा स्यात् व्यामाङ्गुलाङ्गुष्ठकचाग्रभेदात् ।
व्यामाङ्गुलः प्राणिति देहमेनं, व्याप्नोति चालोमनखाग्रदेशम् ॥३९३॥

जिहासतो देहममुष्यदेहः संक्षिप्यतेऽङ्गुष्ठमितः स भूत्वा ।
प्रयाति भूतात्मगतः स लोकान् बालाग्रमात्रस्तु मतः स शुद्धः ॥३९४॥

तत् प्राणनं व्यानमितिं यदेति बालाग्रमानं तदपाननं स्यात् ।
वैश्वानरोऽग्निः पर ऐन्द्र आत्मा प्राणित्यपानित्यनयोस्तु हेतोः ॥३९५॥

अजो महानत्यणुरेव देहे स प्राणभूतानुशयाद् विवृद्धः ।
अंगुष्ठमात्रः प्रमितः स्वतोऽसौ व्याप्नोति सर्वां तु शरीरयष्टिम् ॥३९६॥

त्यजन्,मुमूर्षुः, पुनरङ्गमङ्गं स कूर्मवत् संक्षिपति स्वमङ्गम् ।
अंगुष्ठमात्रः स भवन् शरीराद्बहिः स भूतानुशयः प्रयाति ॥३९७॥

चतुर्युताशीतिसुलक्षमानात् स्युः प्राणिनां योनय इत्युशन्ति ।
ताश्च प्रवृत्ताः स्वयमादिकाले स्युर्मूर्तयस्तास्वनिरुक्तसंख्याः ॥३९८॥

श्रद्धाभिधा आप इहेन्दुरश्मिजास्ताः पञ्चमीमाहुतिमन्वयं पुमान् ।
श्रद्धा हि नानाविधयोनिमूर्तिषु प्रसङ्गतस्ताः परिणाममीहते ॥३९९॥

श्रद्धा द्युलोकं प्रतिपद्य सोमः सोमश्च पर्जन्यमुपेत्य वृष्टिः ।
वृष्टिश्च पृथ्व्यामुपपद्यतेऽन्नं तत्पुंसि रेतः स्त्रियि पूरुषस्तत् ॥४००॥

यथाभ्रवाय्वम्बुशरीरमुक्तं तथा महानस्त्यशरीर आदौ ।
श्रद्धामयः सङ्गवशात्तु तत्तद्रूपी स केदारगताम्बुवत् स्यात् ॥४०१॥

[1]ब्रह्मादयः स्तम्बकृतावसाना या योनयस्तानि महान्ति सन्ति ।
यथा स्वकर्माथ यथा स्वविद्यं भूतात्मनस्तत्र गतिः स्थितिश्च ॥४०२॥

---

१ पञ्चभिः परात्मभिरेकः परमेश्वरः शरीरी



सर्वज्ञः= परज्योतिः
अन्तर्यामी संवत्सरः } द्यौः=
हिरण्यगर्भः सूर्य्य- } दिव्य आत्मा
संवत्सरः

सूत्रात्मा- अन्त-
तेजनः रिक्षम्=
तेजनात्मा

महानजः= चन्द्र-
संवत्सरः } पृथ्वी=
विराट्= पृथ्वी- } पार्थिवात्मा
यज्ञः संवत्सरः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आग्नेयदेवात्मन एष वीर्य्यं लब्धा महान् सौम्य उपैति रूपम् ।
योनौ रजस्येत्य यथा तु वीर्य्यं संसृज्य रूपं कुरुते तथेह ॥४०३॥

हिरण्मयो नाम स पूरुषोऽन्यो रेतस्त्वमायाति महत्युपेतः ।
तद्रेतसः सृष्टिमुदाजहारैतरेय आरण्यक उच्यते तत् ॥४०४॥

देवाः प्रदेशादथ वर्षमेभ्योऽस्त्यथौषधिश्चान्नमतश्च रेतः ।
ततः प्रजा इत्यमिरामयः सन् हिरण्मयो ब्रह्मण एष लोकः ॥४०५॥

स्वतो महानस्त्यशरीर एवं भूतात्मसंसृष्टिमुपेत्य बद्धः ।
संसृज्यते पाप्मभिरेष तस्माद्, भवेच्छरीरी च स कर्म भुङ्क्ते ॥४०६॥

अन्नेन रेतः क्रियते ततोऽस्मिन् स्युर्भूतमात्रा अपि पञ्च विष्टाः ।
वैश्वानरोऽधिष्ठित एषु भूतात्मासौ च तेनात्र सह स्थितः स्यात् ॥४०७॥

तं व्याप्य वैश्वानरमात्मभूतं क्षेत्रज्ञ आत्मा च महान् स आत्मा ।
प्रतिष्ठितौ स्तः सह तत्र दैवः क्षेत्रज्ञ आत्मा तु न कर्मलिप्तः ॥४०८॥

योऽयं महानस्ति शरीरनिष्ठस्ततस्त्वसंख्याः प्रतिमूर्तयः स्युः ।
ता भ्रूणरूपाः प्रभवन्ति शुक्रे कश्चित्सुतस्तेषु विजायतेऽस्मात् ॥४०९॥

चान्द्रस्तु संवत्सर एष दिव्यो महान् स एषां महतां परात्मा ।
चतुर्युताशीतिमितानि योनिलक्षाणि पश्यन्ति महान्ति लोके ॥४१०॥

दिव्यस्य भौमस्य रसेऽत्र चान्द्रे संयोगवैचित्र्यवशादभूवन् ।
ता मूर्त्तयः सोमरसैकसारास्ता योनयो हचुत्तरयोनिजानाम् ॥४११॥

चन्द्रादसंख्याः प्रतिमूर्तयस्ता भवन्ति भूत्वा निपतन्ति लोके ।
तत्कर्मजादृष्टजकर्मधारायोगात् ततो योनय उद्भवन्ति ॥४१२॥

देहानुषक्तान्महतोऽप्यसंख्याः पतन्ति नित्यं प्रतिमूर्तयस्ताः ।
योषासृजि प्राप्य सृजन्ति तासां काश्चित्सुता यान्ति निपातमन्याः ॥४१३॥

श्रद्धामयः सोऽस्ति महानिहात्मा श्रद्धास्तु ता या इह चान्द्रय आपः ।
यच्छ्रद्ध आत्मास्ति स तत्स्वरुपो रूपाण्यसंख्यानि भवन्ति तानि ॥४१४॥

इत्थं त्रिधाऽस्मान्महतः शरीरादसंख्यका मूर्तय उद्भवन्ति ।
ता एतदुच्चावचभूतसंघाश्चेष्टन्त इत्थं प्रतियोनि विद्यात् ॥४१५॥

सत्वं रजश्चैव तमश्च तस्मिन् गुणा महत्यात्मनि सन्ति नित्याः ।
यैर्व्याप्य कात्स्न्येंन समग्रभावानयं महांस्तिष्ठति भूतदेहे ॥४१६॥

गुणान्वयो यः फलकर्मकर्ता कृतस्य तस्यैव स चोपभोक्ता ।
स विश्वरूपस्त्रिगुणस्त्रिवर्त्मा प्राणाधिपः संचरति स्वकर्मभिः ॥४१७॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ता भूतमात्राः पृथिवीनिबद्धाः संत्यज्य यत्रैष महान् प्रयाति ।
स तत्र युक्तोऽनुशयस्वरूपैस्तैर्भूतसूक्ष्मैः क्रमते परत्र ॥४१८॥

वाय्वादियोगात् स्वयमन्तरिक्षे तत्रोपसीदन्ति च पञ्चमात्राः ।
तद्यातनार्थी यमसुष्य ताभिस्पूत्पद्यते तर्हि शरीरमन्यत् ॥४१९॥

ते यातनास्ता अनुभूय यामीस्तदा शरीरेण तु तेन तत्र ।
तद्भूतमात्रासु विभज्य भूतात्मानो विलीयन्त इति प्रतीमः ॥४२०॥

यो भूतमात्रानुशयः प्रकृत्या सिद्धः सहैवोत्क्रमते परत्र ।
तस्याभिमान्यभ्ययते स भूतात्मा तं महान्तं स युजं च तं ज्ञम् ॥४२१॥

तां स्तांस्तु लोकानुपगम्य भूयो यथा स्वकर्मैष यथा स्वविद्यम् ।
तत्रावशिष्टेन तु कर्मणायं पुनः पुनर्जायत एत्य भूमौ ॥४२२॥

क्षेत्रज्ञ आत्मा स महानजात्मा नित्यो स्वतंत्रो सहजो सुलभ्यः ।
तद्युक्तभूतात्मनि भोगसिद्धिः स जायते च म्रियतेऽनुकर्म ॥४२३॥

महांस्तु भूतात्मनि संन्निकर्षाद्बद्धः कथंचिद्भवतीति विद्मः ।
क्षेत्रज्ञ आत्मात्विह योगमाप्तोऽप्यलिप्त एव प्रतिवृत्तिमेति ॥४२४॥

महानात्मा ।

रेतोण्डवर्ष्मा तु य एष चन्द्रस्ततो महांश्चेतनयोनिर्मूर्तिः ।
इन्द्रात्मनो योनिरिहार्तवात्मा स मातृगर्भादुदभूत् तथाहुः ॥४२५॥

विचक्षणाद् ऋतवो रेत आभृतं पञ्चदशात् प्रसूतात् पित्र्यावतः ।
तन्मा पुंसि कर्तर्य्येरयध्वं पुंसा कर्त्रा मातरि मा निषिक्तः ॥४२६॥

स जायमानः उपजायमानो द्वादश त्रयोदश उपमासः ।
द्वादशत्रयोदशेन पित्रासं तद्विदेह प्रतितद्वि देहम् ॥४२७॥

तन्म ऋतवो अमर्त्यव आरभध्वं तेन सत्येन ।
तपसा ऋतुरस्मि, आर्तवोऽस्मि, कोऽसि त्वहमस्मि ॥४२८॥
[कौ० उ. २]

पित्र्यात्मा ।

पिण्डात्मरूपस्तु महान् स चन्द्रं प्रेत्य प्रयात्येष न चान्यलोकम् ।
स सप्त सन्तत्यवधीह चन्द्रे पृथक् स्थितः स्यात् परतोऽपि याति ॥४२९॥

महच्छरीरादिह निष्पतन्त्यस्ता मूर्तयो येन कृता भवन्ति ।
चतुर्युताशीतिमितं तदस्मिन् सौम्यं सहस्तिष्ठति सप्तकोशम् ॥४३०॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पिण्डं तमाहुः स मुहुः शरीरे भूत्वा मुहुस्तत्र विलीयते च ।
स्यादोजसे स्यान्मनसे विलीनं क्षेत्रज्ञ वर्ग्यास्तमदन्ति देवाः ॥४३१॥

यद्यूर्ध्वरेताः प्रभवेत् तदेदं विद्यादधो रेतसि पूयते वा ।
सुतस्तु पत्न्यां स विजायते वा पित्र्योयमात्मा स्वयमस्ति पुत्रः ॥४३२॥

सौम्यांशुपिण्डे द्विविधा विभागाः स्युः सूनवोऽन्ये पितरस्ततोऽन्ये ।
सपिण्डता सप्तसु पूरुषेष्वप्राक्षीत् पुरा दीर्घतमास्तमर्थम् ॥४३३॥

पाकः पृच्छामि मनसा विजानन् देवानामेना निहिता पदानि ।
वत्से बष्कयेऽधि सप्त तन्तून् वितत्निरे कवय ओतवा उ ॥४३४॥
[ऋ० १।१६४।५]

दैवं सहोयन्निहितं हि तस्मिन् पित्र्यं सहोऽप्योतमितीममर्थम् ।
संक्षिप्तमादौ भगवान्महर्षिः स वामदेव्यो बृहदुक्थ ऊचे ॥४३५॥

"महिम्न एषां पितरश्च नेशिरे देवा देवेष्वदधुरपि क्रतुम् ।
समविव्यचुरुत यान्यत्विषुरैषां तनूषु नि विविशुः पुनः" ॥४३६॥
[ऋ० १०।५६।४]

सहोभिर्विश्वं परिचक्रमूरजः पूर्वाधामान्यमितामिमानाः ।
तनूषु विश्वा भुवनानि येमिरे प्रासारयन्त पुरुध प्रजा अनु ॥४३७॥
[१०।५६।५]

द्विधा सूनवोऽसुरं स्वर्विदमास्थापयन्त तृतीयेन कर्मणा ।
स्वां प्रजां पितरः पित्र्यं सह आवरेष्वदधुस्तन्तुमाततम् ॥४३८॥
[ऋ० १०।५६]

नावा न क्षोदः प्रदिशः पृथिव्याः स्वस्तिभिरतिदुर्गाणि विश्वा ।
स्वां प्रजां बृहदुक्थो महित्वावरेष्वदधादा परेषु ॥४३९॥
[ऋ० १०।५६।७]

एषां बलानां पितरश्च देवाश्चापीशते ते समविव्यचुश्च ।
क्रतुं च देवेष्वदधुः पृथक्स्थानिमान् प्रमीताः प्रविशन्ति पश्चात् ॥४४०॥

लोकान् सहोभिर्निखिलानटन्ति पूर्वाणि धामान्यमितानि मात्वा ।
यच्छन्ति तन्वां भुवनानि तानि प्रसारयन्ते बहुधा प्रजाश्च ॥४४१॥

ये स्वर्विदो येऽप्यथ राक्षसा इति द्वेधाऽसुरा, स्वर्विद शुक्लचन्द्रमाः ।
मासेन सौम्यांशव आत्मनि क्रमादाशेरते विंशतिरष्टचात्मिकाः ॥४४२॥

नाक्षत्रमासाबुदयैरथ स्वैश्चन्द्रोंऽशुभिन्दून् सृजतीह देहे ।
पिण्डोऽष्टयुग् विंशतिबिन्दुभिस्तैरुद्भूय चोद्भूय वियाति काले ॥४४३॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तत्पिण्डसंतानवशादपत्यान्युद्यन्ति तत्संतननं क्रमेण ।
एत्येकयुग्[21] विंशतिरस्य पुत्रे [७]सप्तास्थुरात्मन्यनुयोगि सूत्रम् ॥४४४॥

पुत्राद्गताः [१५]पञ्चदशास्य पौत्रे पुत्रे [६]षडक्ता अनुयोगि सूत्रम् ।
पौत्रात्प्रपौत्रे तु सुता दश स्युः, पञ्चावशिष्टास्तु वसन्ति पौत्रे ॥४४५॥

[६]षट-त्र्ये[3]-क[1]-बिन्दु क्रमतः परेभ्यः सुत्याः कृताः सोतृषु चापरेऽस्थुः ।
तदित्थमेकः क्रमतोऽस्ति पिण्डः संतानितः सप्तसु पूरुषेषु ॥४४६॥

सौम्या सुरा आत्मागता द्विधा, पुनः स्युः सूनवः स्युः पितरः पृथक् पृथक् ।
एकाधिकाविंशतिरत्र सूनवः, सप्तावशिष्टाः पितरो न सूनवः ॥४४७॥

पुत्रस्य चाध्यात्ममिहैकविंशतौ स्युः सूनवः पञ्चदशात्मनीह षट् ।
पौत्रे पुनः स्युर्दश, सूनवः परे पंचावशिष्टास्तु तदात्मतां गताः ॥४४८॥

षट् सूनवोऽथ त्रय एव सूनवोऽप्येकोऽत्र सूनुः पितरोऽवशेषिताः ।
इत्थं क्रमात् प्राणितनौ पृथक् पृथक् ते सूनवस्ते पितरोऽसुरश्च सः ॥४४९॥

पंञ्चाशदित्थं सह यड्भिरुत्तरैः सहांसि पित्र्याणि सहानुशेरते ।
स्वतः पुनर्विंशतिरष्टचाहिताश्चतुर्युताशीतिसहांसि तद्विदुः ॥४५०॥
तत्सूनवः पित्र्यसहः स्वकं सहोऽप्यास्थापयन्तीह सह स्थितं द्विधा ।
आत्माऽभवद्विंशतिरष्ट च ध्रुवाः रसेषुभिः संततितन्तवे मिताः ॥४५१॥

चत्वारि कर्माणि भवन्ति तत्र, द्वाभ्यां ग्रहस्त्याग उतापराभ्याम् ।
उत्पद्य जीवन् जनयत्यपत्यान्युत्क्रम्य चन्द्रे विलयं प्रयाति ॥४५२॥

प्रजायते पित्र्यसहोभिरादितश्चन्द्राच्च गृह्णाति पृथक् सहः क्रमात् ।
पितुश्च चन्द्राच्च वहोन्मितानि स द्वाभ्यामुपादाय सहांसि जीवति ॥४५३॥

अथ द्विधा स्थापिततत्सहश्चयात् स्वीयं सहः, पित्र्यसहश्च तन्तुवत् ।
गोत्रेऽवरेष्वाततमादधुस्तु यत् सा सन्ततिर्नाम तृतीयकर्म तत् ॥४५४॥

संतानितं सप्तविधं तदुत्क्रमात् पुनर्यदा ज्योतिरुपैति तन्निजम् ।
गोत्रेऽष्टमे सन्ततितन्तुसंग्रहात् संपद्यते स्वात्मनि पूर्णतां गतम् ॥४५५॥

स पूरुषः प्रैति यदा तदानीमयं महांश्चन्द्रमसि प्रयाति ।
आसप्तमं पूरुषमत्र तिष्ठन् विमुच्यते संततिबन्धसूत्रैः ॥४५६॥

चन्द्रस्थसोतृष्वथ चन्द्रगः सन् प्रत्यर्पयेद् र्यहि तदैषलब्धैः ।
स्वैरष्टयुग्विंशतिबिन्दुभिस्तैर्विच्छिन्नसूत्रः स भवेदपत्यैः ॥४५७॥

एतच्चतुर्थं किल कर्म धीयते संसृज्यते यत् त्रिषु पूर्वकर्मसु ।
भूतैः पृथिव्या तदितोऽतिमुच्यते नास्य प्रजातन्तुरिहास्ति चाततः ॥४५८॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इत्थं पितृस्तोमगतिः सपिण्डतापरेषु सप्तस्वपरेषु चोदिता ।
भूतात्मदिव्यात्मयुजोऽन्तरात्मनः सौम्यस्य, नातः परतः स्थितः क्वचित् ॥४५९॥

पारादवाराच्च तटात् प्रवाहं नावेव चान्द्रच्याः प्रदिशः पृथिव्याः ।
दुर्गाणि तीर्णः स्थितिभिः प्रजासु सौम्यो रसः स्वर्विदिहासुरोऽस्ति ॥४६०॥

यथा तु चन्द्रात् पृथिवीमुपैति, यथा पृथिव्याः शशिनं प्रयाति ।
एवं स्वकीयं च सहो नरस्यावरेषु चायाति परेषु याति ॥४६१॥

यदा ततं सप्तसु पूरुषेषु श्रद्धानसूत्रं प्रवदामि तां गाम् ।
प्रत्यर्पणात्सोद्भियते तदासौ स्वयोनिमायाति जहाति यूथम् ॥४६२॥

"अवः परेण पर एना वरेण यदा वत्सं बिभ्रती गौरुदस्थात् ।
साकद्रीची कंस्विदधं परागात् क्वस्वित् सूते न हि यूथे अन्तः" ॥४६३॥
[ऋ० २।३।१७]

एक,स्त्रयः,षड्,दश,किञ्च पञ्च,दशैकविंशत्युदिता विभागाः ।
स्युः सप्तमाद्युत्क्रमपूर्व्यपुम्भ्योऽष्टाविंशतिस्तु स्वगता विभागाः ॥४६४॥

चतुर्युताशीतिमितैस्तदित्थं सौम्यैः सहोभिर्भ्रियते य आत्मा ।
सोऽयं महांश्चन्द्रमसो हि लोकादुपेत्य योन्याकृतिभेदमेति ॥४६५॥

यो ह्यन्नमार्गेण निविश्य चन्द्रो देहित्वमाप्तः स महानजात्मा ।
साक्षात्तु मासादुदयाच्चितोयं पिण्डात्मतामेति स पित्र्य आत्मा ॥४६६॥

सर्वासु योनिष्विह मूर्तयो या उच्चावचानेकविधा भवन्ति ।
यो योनिरासां स महानमुष्मिन् बीजप्रदोऽसौ त्रिविधोऽन्य आत्मा ॥४६७॥

स्वदेहतो यो गुरुभारमर्थं प्रोत्याप्य कष्टेन पदानि धत्ते ।
पतिष्णुभूतात्मनि तत्र यत्नैर्धत्ते महांस्तैजसतो बलानि ॥४६८॥

महान् दैवात्मा ।

अजेतरोऽप्यस्ति महान् द्विधायं पित्र्यश्च दैवश्च तयोस्तु पित्र्यः ।
मातापितृभ्यामिह जन्मकाले रेतोऽनु देहे सहजः पृणक्ति ॥४६९॥

साधारणः सोऽस्ति मनुष्यमात्रे तस्येह रूपं तु यथावदुक्तम् ।
अतः परं दैवमनुब्रवीमि स जायते यज्ञत एव यत्नात् ॥४७०॥

वेदप्रदाचार्य्यवरः पितैव मातेह सावित्र्युपपद्यतेऽस्य ।
वेदोपनीतस्म हि तस्य यज्ञादन्योऽयमात्मा भवति स्वतन्त्रः ॥४७१॥

वैश्वानरो यज्ञमयो यतोऽस्मिन् यज्ञस्ततः पित्र्यमहानुपैति ।
संवत्सरेऽजनौ तु यदाऽस्य यज्ञः प्रवर्तते तर्हि स दैव आत्मा ॥४७२॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अग्नौ तु सोमाहुतिरेव यज्ञः, सोमोऽग्निभुक्तोऽन्वयते यदाग्नौ ।
प्राणाशितोर्गूजन्मपरम्परां स प्रवर्त्तयत्येष मतस्तदात्मा ॥४७३॥

तन्मानुषं जन्म यदाऽस्य पित्र्योर्महानिमं भौतिकदेहमेति ।
दैवं तु तज्जन्म यदास्य दैवो महानिमं भौतिकदेहमेयात् ॥४७४॥

इत्थं द्विजन्मान इमे त्रयः स्युर्वर्णा यदा यज्ञपरोः भवेयुः ।
लोके च वेदे च कृता लभन्ते भौमाश्च दिव्यानुभयत्र भोगान् ॥४७५॥

दैवात्मना तस्य स मानुषात्मा संपूच्यते तेन स दिव्यमूर्त्तिः ।
यज्ञप्रभावादुपयाति दिव्यान् लोकान् प्रकाशान् सुखमेषु भुङ्क्ते ॥४७६॥

"सूत्रात्मा" व्यानात्मा च ।

महोश्च वैश्वानर इत्यवस्तात्, स तैजसः प्राज्ञ इमौ परस्तात् ।
सौम्योऽयमात्मा, पर ऐन्द्र आत्मा, सहस्थितौ दीर्घतमास्तथोचे ॥४७७॥

महाँश्च वैश्वानर इत्यवस्तात् स तैजसः प्राज्ञ इमौ परस्तात् ।
योगेन ते जीवनयज्ञमेकं व्यानात्मिकायां प्रयजन्ति वेद्याम् ॥४७८॥

रेतोगतोवायुरिहान्तरीक्ष्यो बन्धं कथंचिद्गमितोऽत्र तिष्ठेत् ।
व्यानः स आत्मा स विभूयमानो भौमात्मदिव्यात्मयुतिं करोति ॥४७९॥

व्यानः शिशुः सोऽस्ति शरीरमध्ये, स एक इष्टेऽखिलदेहतन्त्रम् ।
शरीरमाधानमिदं हि प्रत्याधानं तदन्नं पुनरस्य दाम ॥४८०॥

स्थूणास्य च प्राण इमं तमेता उपस्थिता अक्षितयस्तु सप्त ।
इन्द्राग्निरुद्रा अपि चादितेयाः पर्जन्य एवं पृथिवी तथा द्यौः ॥४८१॥

स वामनो वा स हि वामनी र्वा स भामनीस्तं ह्यनु विश्वदेवाः ।
प्राणं सवाऽन्नपतीममूध्वं स प्रत्यगस्यत्यधरं त्वपानम् ॥४८२॥

ये सूर्य्यतो ये पृथिवीत एते देवा इहास्मिन्निवसन्ति देहे ।
आत्मायमेषामपि सोऽन्तरीक्ष्यो वातायनः प्राह तथा महर्षिः ॥४८३॥

"अन्तरिक्षे पथिभिरीयमानो न निविशते कतमच्च नाहः ।
अपां सखा प्रथमजा ऋतावा क्वस्विज्जातः कुत आ बभूव ॥४८४॥
[ऋ० ८।८।२६]

आत्मा देवानां भुवनस्य गर्भो यथा वशं चरति देव एषः ।
घोषा इदस्य शृण्विरे न रूपं तस्मै वाताय हविषा विधेम" ॥४८५॥
[ऋ० ८।८।२६]

स प्रागवाक् प्रत्यगुदक् च पृष्ठे पुरोऽध, ऊर्ध्वं, परितः, स्वरश्मीन् ।
प्रताय चालोमनाखाग्रदेशान् बिर्भत्ति संधाय शरीरयष्टिम् ॥४८६॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दिव्यात्मभौमात्मयुतिं तथास्मिन् करोति सूत्रप्रतिमोऽयमात्मा ।
आत्मत्रयं येन मिथोनुषक्तं जीवात्मतामेति मनुष्यदेहे ॥४८७॥

सूत्रात्मना व्यान उपेत्य वायुः संस्तभ्य संदर्भति सर्वमङ्गम् ।
तत्प्राणमात्राः सह भूतमात्राः सहज्ञमात्राश्च भवन्ति दृब्धाः ॥४८८॥

उपासते व्यानमशेषदेवा, हृद्यस्य निष्ठा हृदयस्य तस्य ।
पञ्चैव दैवाः सुषयो भवन्ति तेभ्योऽन्नमश्नन्ति हि पञ्च देवाः ॥४८९॥

स प्राङसुषिश्चक्षुरिहादितेयः, श्रोत्रं सुषिर्दक्षिण एष चन्द्रः ।
प्रत्यङसुषिर्वागयमग्निरुक्तो मनस्तु पर्जन्य उदङसुषिः स्यात् ॥४९०॥

ऊर्ध्वः सुषिर्व्योम स वायुरित्थं पंचाप्यमी ब्राह्मणपूरुषाः स्युः ।
स्वर्गस्य लोकस्य हि सर्व एते स्युर्द्वारपा इत्थमुवाच ताण्डचः ॥४९१॥

परो दिवो ज्योतिरनुत्तमं यद् विश्वस्य पृष्ठेषु विभाति किञ्चित् ।
ज्योतिस्तदन्तः पुरुषे प्रतीयाद्देहोष्मिणमानाहतनादमूलम् ॥४९२॥

यदस्ति किञ्चिद्वसुधानकोशे सर्वं तदस्तीह च देहकोशे ।
सर्वं यथाऽमुत्र हि पञ्च देवाः प्राणास्तथा पञ्च वपुः स्वरूपम् ॥४९३॥

नातः परं किञ्चिदिहास्ति देहे, पञ्चाणुधर्मा इह देहधर्माः ।
देवाः समस्ता वसुधानकोशः प्राणाः समस्ताश्च शरीरकोशः ॥४९४॥

स्यादन्तरिक्षं जठरं, दिशोऽस्य स्युः स्रक्तयो, भूमिरमुष्य बुध्नः ।
स्यादुत्तरं तस्य बिलं तथा द्यौर्विश्वाश्रयोऽसौ वसुधानकोशः ॥४९५॥

यथा च देवा वसुधानकोशे, प्राणा यथा वेह च देहकोशे ।
चरंति तेषां च परस्परेण प्रवृत्तिरेतत्परतः प्रविद्यात् ॥४९६॥

मध्ये त्रिलोक्या इव सूत्रमात्मा स व्यान आत्मास्ति शरीरमध्ये ।
प्राणद्वयं तत्र परस्परेणोयमर्द्दतोऽग्निं सृजतीह देहे ॥४९७॥

ये चेतनास्तेषु विदुस्तदित्थं दशात्मनस्ते सयुजोऽगुरैक्यम् ।
आत्मान एते दश, नाधिकाः स्युर्ज्योतिः परं तत्र च मुख्यमेकम् ॥४९८॥

इत्यात्मकल्पः संपूर्णः ॥

अथ नाडीसञ्चारः

तेषामिदं प्राणनमप्यपाननं स्यादष्टसंस्थं तदतः परं ब्रुवे ।
हृद्रेतसोः, श्वासनिमेषसुप्तिषु, स्वप्नोहने, मृत्युविमोक्षयोरपि ॥४९९॥

व्यानो रविप्राणमुपेत्य भौमं त्यजेद् भुवः प्राणमुपेत्य सौरम् ।
पर्य्यायतो दोलकवत् स युङक्ते तत्प्राणनापाननमस्ति तस्य ॥५००॥

वैश्वानरः प्राणिति चाप्यपानिति, व्याने ततो हृत् स्फुरतीदमन्वहम् ।
संधुक्षितस्तेन रसोऽसृगात्मनाऽङ्गैरोमयः संभरतीति जीवति ॥५०१॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हृत्स्फूर्तिरेका विपलद्वयेन, त्रिंशद्धि ता एकपलेन च स्युः ।
घटचैकयाऽष्टादश वा शतानि नाडीगतिर्हृत्स्फुरणानुसारात् ॥५०२॥

मुहूर्तमात्रे बृहतीशतं स्फुरेत् त्रिंशन्मुहूर्तेर्हृदयं स्फुरेदिदम् ।
लक्षं सहस्राष्टकसंयुतं ततो नाडीगतिस्तावदहर्निशं भवेत् ॥५०३॥

मानष्टिमात्रेऽपि च पञ्चसप्ततिर्होरामिते सार्द्धचतुःसहस्रकम् ।
होराचतुर्विंशतिके तु हृद्गतिर्लक्षं सहस्राष्टकसंयुतं भवेत् ॥५०४॥

इत्थं प्रतिश्वासममुष्य नाड्यः स्फुरंति, मन्ये किल पञ्चकृत्वः ।
यद्येकमानेष्टिगता अमुष्य श्वासा मताः पञ्चदश प्रमाणात् ॥५०५॥

प्रत्येकमानेष्टिगतामिदानीमष्टादशश्वासगतिं विदुर्ये ।
तेषां प्रतिश्वासमिमास्तु नाड्यः सर्वाश्चतुःकृत्व इव स्फुरंति ॥५०६॥

यत्कर्णमूलादिशरीरभागे भवन्ति नाडीस्फुरणानि तानि ।
त्रिंशत् स्युरेकेन पलेन दण्डेनाष्टादशैकेन शतानि तु स्युः ॥५०७॥

अष्टौ सहस्राणि च लक्षमेकं चैतान्यहोरात्रत आभवन्ति ।
सूर्य्यस्य गत्या स्युरिमानि नाड्यः, स्युः सूर्य्यनाडीभिरिमा हि देहे ॥५०८॥

यतस्तु नाड्यः प्रसृताः समन्तात्, स आत्मबिम्बो हृदि संनिविष्टः ।
मनोमयः, प्राणमयः, स आत्मा स वाङ्मयः सूर्य्यवदस्ति कल्पः ॥५०९॥

ममाङ्गुलीवक्रितचक्षुरन्तः पश्यन् क्षणं भास्वरबिम्बमेकम् ।
पश्यत्यकस्माद्धृदयात्मनो भाः सोपेत्य चक्षुर्विवरेण भीतिः ॥५१०॥

प्राणश्च वाचश्च मनांसि चास्मिन् प्रत्येकतः स्युर्बृहतीसहस्रैः ।
इत्थं सहस्राष्टकयुक्तलक्षोन्मितै रजोभिः स ह पूर्ण आत्मा ॥५११॥

	परमात्मानः		जीवात्मानः	रजांसि	रजोभेदाः	आत्मभेदाः	प्रजापतयः	क्षेत्रज्ञः
१	अन्तर्यामी	१	प्राज्ञः	इन्द्रः			संवत्सरः	
२	हिरण्यगर्भः	२	तैजसः	उत्तमाग्निः			संवत्सरः	
३	विराट्	३	वश्वानरः	प्रथमाग्निः	अग्निः	दैवात्मा पुरुषः	संवत्सरः	भूतात्मा
४	सूत्रात्मा	४	व्यानात्मा	मध्यमाग्निः			संवत्सरः	अन्त-
५	महानात्मा	५	पिण्डात्मा	आपः	सोमः	पित्र्यात्माप्रकृतिः	संवत्सरः	रात्मा

नाड़ीस्फुरणम्	मानेष्टिर्होरायाः षष्टितमो भागः नाडीस्फुरणम्			
२ विपलद्वये १			१ मानेष्टौ श्वासाः १५	आर्य्यमते
१ पले ३०	१ मानेष्टौ	७५	१ श्वासे नाड़ीस्फुरणम् ५	
१ घट्याम् १८००	१ होरायाम्	४५००	१ मानेष्टौ श्वासाः १८	
१ मुहूर्ते ३६००	१ अहोरात्रे	१०८०००	१ श्वासे नाड़ीस्फुरणम् ४	अनार्य्यमते
३० मुहूर्तेषु १०८००				

सूर्य्य से पृथ्वी तक सूर्य्य तेज आने में आठ मिनट अठारह सेकण्ड लगता है। उसका बीसपल ४५ विपल हुआ। पृथ्वी से सूर्य नौ करोड़ बीस लाख मील दूर है। ये दोनों अंग्रेजी हिसाब है।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्राणेन, वाचा, मनसावक्लृप्तेरेकैक आत्मा त्रिरजाः प्रदिष्टः ।
रजस्त्रिकाणीत्यमिहात्मबिम्बे भवन्ति मित्या बृहतीसहस्रम् ॥५१२॥

मर्त्यं च वागस्त्यमृतं मनश्च प्राणस्तु मर्त्यामृतरूप इष्टः ।
निवेशयत्यात्मनि तान् हि भावान् प्राणादिरूपः स बहिःस्थ आत्मा ॥५१३॥

ब्रह्माण्डगर्भे च शरीरगर्भे यावत् तपत्येष हिरण्मयोऽग्निः ।
संधाय तावत् तपनोऽयमात्माऽन्तरात्मभावाँश्च बिर्भात्ति तान् स्त्रीन् ॥५१४॥

[1]सूर्य्यो य आभाति बहिःस्थ आत्मा स आत्मबिम्बे बृहतीसहस्त्रे ।
एकैकतस्तानि रजांसि विध्यन् अह्ना परिक्रामति सर्वदिक्षु ॥५१५॥
आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च । [१।३५।२।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥५१६॥

य आत्मबिम्बो बृहतीसहस्रात्मनां समष्टीरजसां तु लक्षम् ।
अष्टौ सहस्राणि च सन्ति यस्मिन्नध्यात्मसूर्य्यः स शरीरधाता ॥५१७॥

ज्योतिश्च गौरायुरिति त्रयो ये स्तोमास्तदायुर्जनितोऽयमात्मा ।
तदायुरिन्द्रं त्वमृतं पठन्ति कौषीतकेया ऋषयः परेऽपि ॥५१८॥

य एष आत्मा बृहतीसहस्रात्मकः स सर्वेन्द्रियधारकेन्द्रः ।
तमैतरेयोऽप्यनुवक्ति विश्वामित्रं तदन्नं बृहतीसहस्रम् ॥५१९॥

प्राणांश्च वाचश्च मनांसि चेत्थं प्रत्यात्मभावान् प्रयुनक्ति बिभ्रत् ।
सूर्यो हरंस्तांश्च ततो वियुङ्क्ते तत्प्राणनापाननकर्म विद्यात् ॥५२०॥
मनो हरत्येष ततो मनश्चितीः प्राणान् हरन् प्राणचितीश्च संततम् ।
वाचं हरन्वाचि चितीश्च संहिताः संपाद्य धत्ते बृहतीसहस्रवत् ॥५२१॥

यच्चिन्तयत्येष करोति कर्म यद् भवन्ति ये दैहिकधातवोऽनिशम् ।
पूर्वाणि नश्यन्ति, नवानि चासते, तत्प्राणनापाननकर्महेतुकम् ॥५२२॥
अपानिति, प्राणिति, चेत्थमेषस्त्रिस्त्रिर्हि प्रत्यात्मरजःप्रभेदात् ।
अष्टौ सहस्राणि च लक्षमेकं भवन्ति नाडीस्फुरणानि तस्मात् ॥५२३॥

[1]



मनसामुपरि प्राणाः, तदुपरिवाचः षट्त्रिंशत्सहस्राणि मनांसि, तावन्तः प्राणाः । तावत्यो वाचः, वाक्प्राण-मनांसि त्रिवृद्रूपस्यात्मनो रूपाणि ते त्रिविद्रूपा आत्मनः षट्त्रिंशत्सहस्राणि

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

छन्दांस्यहोरात्रकराणि यानि खे सप्त प्रसिद्धयन्ति तदन्तरे स्थिताः ।
या नाडिकास्ते विषुवाभिधा हि सा प्रोक्ता बृहत्त्वाद् बृहतीतिसंज्ञया ॥५२४॥

दशाक्षरा यास्ति विराट्, तदक्षरं तान्यत्र षट्त्रिंशदिति प्रचक्षते ।
तयै व तु प्राणिगणस्य विग्रहे स मेरुदण्डः क्रियते तथाक्षरः ॥५२५॥

खेऽध्यूढ एतां सविता चरत्ययं सहस्ररश्मिः स इहाक्षरेऽक्षरे ।
सहस्ररश्मीन् निदधाति, जायते तेनायमात्मा बृहतीसहस्रकः ॥५२६॥

प्राणेन, वाचा मनसा, त्रिवृत्कृतोऽस्त्येकैक आत्मा त इमे तथाविधाः ।
मनुष्यदेहे बृहतीसहस्रकाः प्रमाणतः सन्ति सहैकतां गताः ॥५२७॥

स वा अहोरात्रत आत्मबिम्बो व्यावर्तते भूमिवदेव नित्यम् ।
एकैक आत्मा वयनाभिमुख्ये पर्य्येति षट् षड् विपलानि तिष्ठन् ॥५२८॥

तत्रैष सूर्य्यो विपलेषु षट्सु त्रिःप्राणनापाननकर्म धत्ते ।
रजस्तदेकैकमयं क्रमेण प्रमार्ष्टुमीर्त्ते विपलद्वयेन ॥५२९॥

पृथ्व्यात्मनाऽनेन हिरण्मयेन प्रच्छादितेऽस्मिन् बृहतीसहस्रे ।
अल्पावभासे मनसोऽस्त्यबोधोऽष्टाष्टाष्टवर्षैः क्रमतोऽस्यपाकः ॥५३०॥

तत्प्राणनापाननयोस्त्रिकाणां षट्त्रिंशदह्ना तु सहस्रकाणि ।
प्रयुज्य पृथ्व्यात्मतमिस्रबन्धात् करोति मुक्तं बृहतीसहस्रम् ॥५३१॥

एकेन चाह्नात्र हिरण्मयात्मनो बन्धं लयं तावदयं रविर्भ्रमन् ।
कृत्वा पृथक्त्वं विदधाति यावता सर्वात्मनाऽऽत्मैक इतः पृथग् भवेत् ॥५३२॥

क्रमादहोभिर्बृहतीसहस्रैः सर्वात्मनाऽहं बृहतीसहस्रः ।
पृथ्व्यात्मबन्धात्तु यदातिमुच्ये व्यक्त्वा भुवं तर्हि दिवं व्रजामि ॥५३३॥

तदेतदाहुः पुरुषायुषं शतं वर्षाणि पश्चान् म्रियते निसर्गतः ।
षड्नपंचाशदिहातिरिच्यतेऽब्दानां निमित्तात् त्वमितं ह्रसन्त्यपि ॥५३४॥

तद्देशकालौ ग्रहचारभेदा, बीजस्य योन्याश्च विशिष्य दोषाः ।
एभिर्निमित्तैः क्वचिदायुषः स्तो वृद्धिक्षयावात्मबलाबलाभ्याम् ॥५३५॥

अविप्लुतं ब्रह्मचर्य्यं यद्व्रतविद्ययोस्तत् ।
त्रैपुरुषानुवृत्तं संध्याक्रियाहारविहारशुद्धिः सत्यं यमश्चात्मबलोदयाय ॥५३६॥

इत्थं नराणामिदमायुरुक्तं प्राण्यन्तराणां तु ततोन्यथायुः ।
आयुर्वशादेव तदात्मसंख्याः पृथक् पृथक् तेष्वपि कल्पनीयाः ॥५३७॥

निश्वासोच्छ्वासौ

अपानिति, प्राणिति, वृत्तिरेषा दिव्यात्मभौमात्मगता निसर्गात् ।
किन्तु द्वयोः संग्रहणं मिथो यत् तद् व्याननं सृष्टिबलं ततः स्यात् ॥५३८॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain

Digitized by Madhuban Trust, Delhi

न प्राणनान्नैतदपाननना‌द्वा, कस्यापि मर्त्यस्य तु जीवनं स्यात् ।
उपाश्रितौ यत्र तु ताविमौ स्तो व्यानेन तेनोदयनं समेषाम् ॥५३९॥

सूर्यादयं प्राणविशेष ऊर्ध्वादायात्यधस्ताच्च महीसमुत्थः ।
व्याने तयोः प्राणनयोः प्रसृष्टिर्याव‌द्ध्रुवेज्जीवति तावदेषः ॥५४०॥

संक्रम्यते प्राण इहेत्य सूर्यात् तत्प्राणनं तस्य भवत्यथायम् ।
व्यानाहतोऽस्मात्परिवर्त्य भूयो दिवं यदेत्येतदपाननं स्यात् ॥५४१॥

संक्रम्यते प्राण इहेत्य पृथ्व्यास्तत्प्राणनं तस्य भवत्यथायम् ।
व्यानाहतोऽस्मात् परिवर्त्य भूयो भुवं यदेत्येतदपाननं स्यात् ॥५४२॥

प्राणस्य दिव्यस्य यदस्त्यपाननं तनोर्ध्वगत्या तदुदाननं विदुः ।
यत्प्राणनं भौमरसस्य वर्ष्मणि प्रवेशनं तत्तु समाननं विदुः ॥५४३॥

यावत् तयोर्योगवशादिह स्थितिर्न प्रैति, नापैति, सहैकभावितः ।
संस्तभ्य शारीरविधौ नियुज्यते, तद्व्याननं, तेन शरीरसाधनम् ॥५४४॥

व्यानेन संयुज्य पुनः परैति, गां सूत्रमापात्य विरामवृत्तिः ।
तिष्ठंश्च गच्छंश्च स इत्थमन्तर्वृणोत्यसौ दीर्घतमास्तथाह ॥५४५॥

"अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरन्तम् ।
स सध्रीचीः स विषूचीर्वसान आवरीवर्त्ति भुवनेष्वन्तः" ॥५४६॥
[१।१६४।३१]

प्राणोप्यपानोपि तथा समानोदानौ तथा व्यान इतीह पञ्च ।
प्राणास्ततः स्युः प्रथितास्त्रयाणां तत्प्राणनापाननवृत्तियोगात् ॥५४७॥

प्राणोऽप्युदानोपि च तैजसोऽयं वैश्वानरोऽपानसमाननामा ।
व्यानस्तु सूत्रात्मकवायुरन्यस्तत्रैतयोः सर्गविसर्गवृत्तिः ॥५४८॥

भौतेन दिव्यः सयुगेकदेहे प्राणित्यपानित्ययमन्नसंगात् ।
भौतं निचिक्युर्न तु दिव्यमित्थं प्रवक्त्यसौ दीर्घतमा महर्षिः ॥५४९॥

अपाङ्ङ प्राङेति स्वधया गृभीतोऽमर्त्योमर्त्येना सयोनिः ।
ता शश्वन्ता विषूचीना वियन्ता न्यन्यं चिक्युर्न निचिक्युरन्यम् ॥५५०॥
[१।१६४।३८]

उच्छ्वासनिश्वासविधानतोऽयं वायोः प्रवेशोऽपि च निर्गमो यः ।
तत्प्राणनोदाननयोः प्रयोगात् प्राणो व्यनक्ति व्यजनं शरीरे ॥५५१॥

रविर्यथा दक्षिणमुत्तरं वा पर्य्यायतः संचरति स्वमार्गम् ।
प्राणः श्वसन् दक्षिणमुत्तरं वा पर्य्यायतोऽनुक्रमते तथैव ॥५५२॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इडा तु नाडीगतिरुत्तरा चिरात् सा पिङ्गला दक्षिणतो गतिश्चिरात् ।
समा सुषुम्णागतिरल्पकालतः प्राणः स सूर्यप्रकृतिस्तनुस्थितः ॥५५३॥

खखाङ्गभूनेत्रमिताः कलाः खे श्वसन् परावर्त्तयते रविस्ताः । [२१६००]
सूर्य्यात्मकः प्राण इहात्मभूतस्तावन्मिताः श्वासगतीः करोति ॥५५४॥

खखाङ्गभूनेत्रमितास्तु घट्यः संवत्सरे सूर्यगतेः फलन्ति । [२१६००]
अहश्च संवत्सर एव तस्मिन्नस्यात्मनः श्वासगतिस्तथास्ति ॥५५५॥

श्रमाधिकत्वे त्वधिकं कदाचित् कदाचिदल्पं श्वसितीह रोगात् ।
स्वस्थस्य यूनः श्वसनं प्रमाणात् तथा हचूषिर्वार्कलिरभ्युवाच ॥५५६॥

श्रमादन्यत्र परिवर्तमानस्तिष्ठन्नासीनो यदि वा स्वपन्नपि ।
अहोरात्राभ्यां पुरुषः समेन कति कृत्वः प्राणिति चापचानिति ॥५५७॥

शतं शतानि पुरुषः समेनाष्टौ शता यन्मितं तद्वदन्ति ।
अहोरात्राभ्यां पुरुषः समेन तावत्कृत्वः प्राणिति चापचानिति ॥५५८॥

शतं शतानीति यदाह मानं तद्वै सहस्राणि दशेति विद्यात् ।
अष्टौ शतान्यप्यधिकानि तस्मिन्नेतावदह्ना श्वसितीव रात्र्या ॥५५९॥
[१०८००]

श्वासा दिने द्वादश वै सहस्राण्यथो शतान्यत्र नवाथ षष्टिः । [१२९६०]
[1]नक्तं तथा तेन भवन्ति ते चाहोरात्रयोर्नारिधमारिमानात् ॥५६०॥
[२५९२०]

इत्थं तु पश्यन्त्यधुनातना यत् सोयं विकारो जनितोऽस्त्यमीषु ।
यथा स षष्टिस्त्रिशती पुराह्नामाहुः प्रपश्यन्त्यधिकानि षट् तु ॥५६१॥

उन्मेष-निमेषौ

स तैजसः प्राज्ञ इति द्विभूतः सूर्य्यात्मकः प्राण इहोपसन्नः ।
उच्छ्वासनिश्वासकृदेक एवं दृश्यन्य उन्मेषनिमेषकृच्च ॥५६२॥

---

[1]

एकस्मिन् संवत्सरे कलाः	२१६००	षण्मासेषु कलाः	१०८००
एकस्मिन् संवत्सरे दण्डाः	२१६००	मुहूर्त्ताः संवत्सरे	१०८००
एकस्मिन्नहोरात्रे श्वासोछ्वासाः	२१६००	अहनि तदर्द्धम्	१०८००

एकपले श्वासोछ्वासाः षट्	···६	एकमानेष्टौश्वासोछ्वासाःपञ्चदश–···	१५
एकदण्डेश्वासोछ्वासाः सषष्टित्रिशती	३६०	एकहोरायां ,, नवशतानि–···	९००
एककलाभोगे श्वासोछ्वासाःसषष्टि-त्रिशती	३६०	चतुर्विंशतिहोरासु षट्शताधिकैकविंशति-सहस्राणि	२१६००

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[1]यत् सार्पराज्ञी रविरोचनाया अपाननं प्राणनमाह देहे ।
उछ्वासनिश्वासविधानमूलं स्याद्वा तदुन्मेषनिमेषमूलम् ॥५६३॥

आदित्य आत्मा बहिरस्ति, योऽन्तरः प्राणः, स एको न विभिद्यते मिथः ।
द्वौ तस्य चारौ भवतोऽन्तरागमो बहिर्गमश्चेति समानवर्तनी ॥५६४॥

व्यावर्त्तने रात्रिरहस्तथैतयोर्नक्तं बहिर्धैति दिवाऽन्तरेति च ।
प्राणोऽन्तरात्मा बहिरेत्यसौ बहिस्थात्माऽयमादित्य इहैति चान्तरे ॥५६५॥

रवेस्तु गत्या बहिरात्मनोऽनयाऽन्तरात्मनोऽपि त्वनुमीयते गतिः ।
[2]इत्याह मैत्रिस्तदपीह तैजसे पर्य्यायतः प्राणनमप्यपाननम् ॥५६६॥

प्रज्ञा सदा नैकविधाऽवतिष्ठते प्रातश्च, सायं च दिवा च, निश्यपि ।
प्रीणात्युदास्तेऽथ हृणीयते क्वचित्, प्रत्यर्थमित्थं श्रयते निवर्तते ॥५६७॥

जाग्रत्-स्वप्नौ-सौरप्राज्ञस्य ।

प्राणेन बद्धं हि मनः सदास्ते, प्राणस्य रूपाणि तु पञ्च देवाः ।
अग्निश्च वायुश्च रविश्च दिक् च पर्जन्य एभिर्मनसोऽन्नलाभः ॥५६८॥

प्राणा इमे, किन्तु स तेषु मुख्यः प्राणोऽस्ति सूत्रात्मतया प्रसिद्धः ।
तेनावियुक्तस्य हि पञ्चदेवैः प्रज्ञस्य संयोगवियोगसिद्धिः ॥५६९॥

प्राणन् मनश्चारयते स्वरश्मीन् देवैस्तदायुक्तमिदं मनः स्यात् ।
कामेरितः प्राण इमान्नियुङ्क्ते देवाहृतान्नानि मनोऽत्र भुङ्क्ते ॥५७०॥

मनो यदा संहरति स्वरश्मीनपानदासीदति बन्धने स्वे ।
तदात्मकामं बहिरङ्गकामैर्वियुज्यते सा मनसः सुषुप्तिः ॥५७१॥

यत्प्राणनं जाग्रदयं स लोकोऽस्त्यपाननं तस्य परोऽस्ति लोकः ।
जागर्ति यत् प्राणिति तद्धयपानन्निद्राति, तौ द्वौ भवतोऽस्य लोकौ ॥५७२॥

इदं पुनः प्राणनमप्यपाननं नैमित्तिकं नत्वनुवर्तते स्वतः ।
प्राणेन बद्धं हि मनो बहिःस्थितैर्देवैः प्रणुन्नं तु युनक्ति कामतः ॥५७३॥

कामेन चाकृष्टमिदं मनः पुनः संसज्जते देवगणैर्बहिश्चरत् ।
देवैर्न युज्येत मनो न तर्हि तत्कामैर्विकृष्येत न जागृतिर्भवेत् ॥५७४॥

---

[1] "अन्तश्चरति रोचना अस्य प्राणदपानीत व्यख्यन्महिषो दिवम्"—[ऋ० सं० मं० १०। सू० १८९] ।

[2] "द्विधा वा एष आत्मानं बिभर्ति-अयं यः प्राणो यश्चासावादित्यः । द्वौ वा एतावस्य पन्थानावन्तर्बहिश्च । अहोरात्रेणैतौ व्यावर्तेते । असौ वा आदित्यो बहिरात्मा । अन्तरात्मा प्राणः । अतो बहिरात्मक्या गत्याऽन्तरात्मनोऽनुमीयते गतिरित्येवं ह्याह" । इति मैत्रिश्रुतिः (मै० उ० ६ प्र०)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अपाननं चापि निमित्ततो मतं रविप्रतापाच्छ्रमशोकतापतः ।
प्रदुष्टरक्तस्य नरस्य शोणिताद्धूमो मनः संवृणुते समुत्थितः ॥५७५॥

प्रदुष्टरक्तं परितप्य दह्यते दाहाच्च सर्वाङ्गगतासृगुत्थितः ।
धूमः शिरोऽभ्याक्रमते तमस्पदो मनः स कृत्वा बहिरेति शीर्षतः ॥५७६॥

धूमो बलादावृणुते तदा मनः करोऽन्तराकृष्यत अश्रु चक्षुषः ।
कृष्णाति धूमस्थितदीपवन्मनः प्राणे निरंशुस्त्ववतिष्ठते तदा ॥५७७॥

सर्वाङ्गतस्त्यक्तगभस्तिमन्मनो नान्तर्न बाह्यं स्पृशतीह किञ्चन ।
विरुद्धमित्थं तु चिरं मनः सह प्राणेन यात्युत्क्रमणं मृतिस्तदा ॥५७८॥

अत्युग्रदेहाग्निमतस्तु शुद्धं स्याच्छोणितं स्वल्पतरोऽत्र धूमः ।
उत्तिष्ठते नात्यसितश्च तस्माद् घोरं न निद्राति न चातिकालम् ॥५७९॥

इत्यान्तरं तत्र निमित्तमुक्तं बाह्यं च वीक्षे बहुधा निमित्तम् ।
स्यान्मादकद्रव्यविषादियोगादाश्चर्य्यभीषादिवशाच्च तद्वत् ॥५८०॥

उच्चान्निपाते जलमज्जने वा वायुः समुद्भूय विरुद्धवृत्तिः ।
मनोमयूखान् प्रतिरुध्य मूर्छां करोति, तत्रापि चिरान्मृतिः स्यात् ॥५८१॥

स्वप्नान्तिकं चान्द्रप्राज्ञस्य ।

यथा बहिर्विश्वमिमे तु तेजसी विभासयेते रविचन्द्रसंज्ञके ।
तथेह देहे रविचन्द्रयोगजौ द्वौ प्राज्ञकोशौ सहयोगिनौ स्थितौ ॥५८२॥

सर्वैश्च देवैरुभयत्र संहितैर्ज्ञानं द्विधोपादयतः स्थिरं चरम् ।
स्थिरं तु सौरेण, चरं तु जायते चान्द्रेण कोशेन, पृथक् पृथक् तत् ॥५८३॥

दृष्टचादिभिर्ज्ञानममीभिरिन्द्रियैर्यदत्र जाग्रत्युपपद्यतेतराम् ।
तत्प्राज्ञकोशादिह सौरतो मतं, तदेकवन्नित्यमुदेति सात्र धीः ॥५८४॥

ज्ञानेन चानेन य आहिता इमे संस्काररूपा विषया हृदाशये ।
तानीक्षते नो बहिरिन्द्रियाण्यमून्यपेक्षतेऽथा कुरुते च शोचति ॥५८५॥

चिन्तात्मकं ज्ञानमिदं तु चान्द्रतः, स्यात् प्राज्ञकोशादविषया इहान्तराः ।
ते चान्तरार्था बहिरर्थवत् स्फुटं न भांति चाभासत एव भान्ति ते ॥५८६॥

अर्थाद्धि यज्जज्ञानमुदेति तन्मतं सौरादथोज्ञानकृतोऽर्थसंभवः ।
चान्द्रान्मतो जाग्रति तत्पृथक् पृथग् ज्ञानप्रकारद्वितयं विभासते ॥५८७॥

चान्द्रं च सौरं च विभागमीदृशं विवक्षमाणस्तु महर्षिगोतमः ।
मनोधियः प्रोच्य सवित्रुपाहिताः प्राहार्थबोधे धिय एव मुख्यतः ॥५८८॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

युञ्जते मनऽउत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः ।
वि होत्रा दधे वयुनाविदेकऽइन्महो देवस्य सवितुः परिष्टुतिः स्वाहा ॥५८९॥
[य० सः ५।१४]

दिवा यथा सूर्यविभाभिभावितश्चन्द्रो नभस्थो मलिनोऽवभासते ।
सूर्योत्थितज्ञानबलाभिभावितश्चन्द्रोदितज्ञाविषयोऽस्फुटस्तथा ॥५९०॥

यदा स्वपित्येष तदास्य भास्करप्रज्ञानकोशास्तमनान्निशायते ।
तदा दिवेवान्तरमर्थमीक्षते चान्द्रज्ञकोशेन स भाति च स्फुटम् ॥५९१॥

चान्द्रज्ञकोशोऽपि यदात्वपाननादस्तं गतस्तर्हि निवर्तते ह्रसन् ।
स्वप्नान्तिकज्ञानमपीदमीदृशीं स्थितिं सुषुप्तिं तु वदन्ति सूरयः ॥५९२॥

प्रज्ञानकोशेऽस्तमिते तु सौरे ज्यौत्स्नीविनाशास्तमिते च चान्द्रे ।
कोशद्वयस्यास्तमने तमिस्रा निशा तदा गाढतमोऽवभाति ॥५९३॥

प्रतिक्षणं चिन्तयते प्रजागरे स्युर्हेतवस्तत्र धियश्च वायवः ।
धियो बले धीरगतेः स्थिरामतिर्वहन्यथाक्षिप्तमतिस्तु वायुतः ॥५९४॥

स्वप्नान्तिकं पश्यति यत्र तत्र तु प्रयोजको वायुरतोऽस्य दोषतः ।
वहन्यथा युक्तमयुक्तमीक्षते न धीस्तदार्थं विविनक्ति सत्यतः ॥५९५॥

सौरे तथानस्तमितेपि चान्द्रः क्वचास्तमायाति, विशेषदोषात् ।
तदा स जाग्रत्यपि सुप्तवत्स्यात् पश्यन्नपश्यत्यतिमुग्धचेताः ॥५९६॥

प्रज्ञानकोशद्वयमेतदन्तर्मिथोऽनुषक्तं प्रतितिष्ठतीह ।
स्वल्पेन कालेन वियुज्य तिष्ठेच्चिरं वियुज्योत्क्रमते मृतिः सा ॥५९७॥

जन्ममृत्यू (प्राणभूतयोः) ।

अग्निर्विधा कश्चन तत्र सोमं विवेष्टि, नैतेन कदापि युंक्ते ।
यमं तमाचक्षत, एष सोमादग्निं पृथक् कृत्य करोति मृत्युम् ॥५९८॥

ततोऽन्य एषोऽग्निरनेन भूयः सोमेन संसृज्य करोति सृष्टिम् ।
सोमोऽमृतं तेन स योगमाप्नोत्यतस्तमत्रामृतमृत्युमाहुः ॥५९९॥

यत्रामृताग्नेस्तदपाननं स्यान्मृत्युं यमस्तत्र विशन् करोति ।
यत्रापि नापाननमस्ति तत्रापमृत्युमाकस्मिकमातनोति ॥६००॥

प्राणप्रसृष्टावथ वायुसृष्टावाप्यप्रसृष्टाविति भेदतः सः ।
यमः पृथक् संचरतीति कृत्वा मृत्युस्त्रिधा संभवतीह देहे ॥६०१॥

आप्यप्रसृष्टौ तु यमः प्रसर्पन् करोति देहाङ्गविघातरोगम् ।
वायुप्रसृष्टौ तु यमप्रवेशे देहात्मविच्छेदकृतोऽस्ति मृत्युः ॥६०२॥

प्राणप्रसृष्टौ तु यमप्रवेशादात्मा स्वरूपाच्च्यवते स मोक्षः ।
रजस्तु योग्निर्य उतैष सोमः सोऽव्यक्त आत्मा न विनाशमेति ॥६०३॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यः सृज्यते स म्रियते कदाचिन्न सृज्यते न म्रियते परात्मा ।
यो वाङ्मनःप्राणमयोऽवरात्मा स सृज्यते तेन स नाशमेति ॥६०४॥

प्राणोऽयमात्मा यदि भूतपिण्डं शरीरमेतत् त्यजति ह्यपानत् ।
मर्त्यं शरीरं म्रियते तदानीं प्राणोऽन्यदेहं समनास्तनोति ॥६०५॥

जाग्रत्सुषुप्ती भवतो यथा द्वे स्थाने विशुद्धस्य मनोमयस्य ।
प्राणस्थवृत्तेर्मनसस्तथैते स्थाने भवेतामिह जन्ममृत्यू ॥६०६॥

प्राणः समेतो मनसा यदायं प्राण्यात् तदा भूततनुं तनोति ।
अपानिति त्वेष यदा तदानीं प्रैति त्यजन् भौतिकदेहमेतम् ॥६०७॥

प्राणो मनो बन्धनमस्ति तन्मनः प्राणातिरेकेण तु नावतिष्ठते ।
आमुक्तिकालादथ यर्हि मुच्यते प्राणो मनश्चैकतयोपपद्यते ॥६०८॥

॥ अथ मूर्त्तिसर्गः ॥

ब्रह्मादिगुल्मोदयमूर्तयो याः स मूर्तिसर्गोऽत्र पृथक् निरुक्तः ।
मर्त्यामृताभौतिकदैविकार्थाः समुच्चिता अत्र हि योनिसर्गे ॥६०९॥

यावत्य एताः प्रतिभांति भिन्नास्ता मूर्तयस्तत् प्रवदामि विश्वम् ।
तां विश्वसृष्टिं श्रुतिपूर्वदृष्टां यथा मनुः प्राह तथात्र वच्मि ॥६१०॥

आसीत्तमोभूतमलक्षणं प्राक् सर्वात्मना सर्वमिदं प्रसुप्तम् ।
अव्याकृतत्वात्तु न नाम रूपं कर्मापि कस्यापि किमप्यवेदि ॥६११॥

अव्यक्तरूपं यदसत् प्रसिद्धं सनातनं सूक्ष्ममतीन्द्रियं च ।
अचिन्त्यमोजस्वि समस्तभूतात्मकं तमोनुत् स्वयमुद्बभौ तत् ॥६१२॥

व्यक्तस्य यस्येह भवन्ति रूपाण्यमूनि भूतानि स एक एषाम् ।
अव्यक्त आत्मा प्रभवः प्रतिष्ठा गतिः स काले स्वयमाविरासीत् ॥६१३॥

व्यक्तोऽग्निरासीदयमग्निरेवाग्निना हतः क्षोभमुपेत्य भूयः ।
परस्पराघातवशेन मूर्छामापद्य यद्रूपमगात् तदापः ॥६१४॥

यो दृश्यतेऽग्निर्न तथायमग्निर्दृश्यस्तु वायुद्वयघर्षजन्मा ।
घर्षाय वायुद्वयमत्र नासीत् त्रयीमयं ब्रह्म तदाग्निरासीत् ॥६१५॥

[1]मनुः स्मरत्येष यथा श्रुतौ तु श्रुतं श्रुतावाह तमग्निमन्यम् ।
यथा श्रुतं वाजसनेयकानां श्रुतौ तदत्राभिदधामि सर्वम् ॥६१६॥

---

[1] मनुस्मृतौ सर्वोऽप्यर्थो मैत्रायणीश्रुत्यनुसारेणाख्यातः । मानवश्रौतसूत्र-मानवगृह्य-सूत्रोक्तानामर्थानां मैत्रायणीयशाखाब्राह्मणानुसारितया दृष्टत्वात् तदेककल्पीये धर्म्मसूत्रेऽपि मैत्रायणशाखीयतायाः प्रतिपत्तेः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वदामि तं प्राणमसद्यदासीदव्याकृतं व्याक्रियते तु पश्चात् ।
प्राणाः स्वभावादिव सप्त सप्त ह्येकैकरूपं जनयन्ति नद्धाः ॥६१७॥

मध्येऽत्र चत्वार इमे तदात्मा पक्षद्वयं पुच्छमिहैकमासीत् ।
एषां रसैः श्रीभिरभूत्पुरस्ताच्छिरस्तदष्टावयवोऽग्निरेकः ॥६१८॥

द्विधायमग्निर्भवति स्वभावाच्चित्योऽथ यस्तत्र चिते निधेयः ।
चित्योऽभवद् भूतमयोऽत्र देहः प्राणस्तदन्तस्तु चिते निधेयः ॥६१९॥

चिते निधेयः प्रथमोऽयमग्निः सृष्ट्वाऽत्मनोंऽशात् स हि चित्यमग्निम् ।
प्रविश्य तत्रात्ति युनक्ति देवैरित्यूचिरे केचन तैत्तिरीयाः ॥६२०॥

प्रजापतिः कश्चिदिहास्ति तस्यामृतं च मर्त्यं च तदर्धमर्धम् ।
इत्थं द्विधा भक्तमिदं शरीरं निसर्गतोऽस्तीति विदुः परे तु ॥६२१॥

तावान् पुराऽव्यक्ततरोऽयमग्निश्चिते निधेयेन सयुक् सचित्यः ।
व्यक्तः स नाद्यापि निधेयरूपो व्यक्तो भवेद् भूतमयस्तु चित्यः ॥६२२॥

चित्यो निधेयश्च सहोभयः स्यान्नान्यः क्वचान्येन विना कृतः स्यात् ।
यत् प्रत्यतिष्ठत् स इयं प्रतिष्ठा विद्यात्रयी ब्रह्म च कथ्यतेऽत्र ॥६२३॥

प्राणोऽग्निरादौ द्विविधो य उक्तश्चिते निधेयात् प्रभवन्ति देवाः ।
सर्वेऽपि देवा इह संश्रिताः स्युश्चित्योऽग्निरेवाभवदत्र सा वाक् ॥६२४॥

प्रजापतिः सप्ततनुः सचित्यस्तस्यैव निश्वासमयी त्रयी सा ।
प्राणोऽतिसूक्ष्मोऽपि स वाक् त्वमेयात् सृष्टिस्वभावाद् घनतामुपेत्य ॥६२५॥

प्राणः स्वभावदनुसृज्य वाचं वाच्येव नित्यं प्रतितिष्ठतीह ।
वाचा वृतः प्राण इह प्रतिष्ठां लभेत, वाक् तु त्रय एव वेदाः ॥६२६

वाक् सा स्वभावादमृता च मर्त्या तत्रामृते साम च ऋक् च रूपे ।
यजुस्तु मर्त्यं प्रभवन्ति, तस्या वाचो हि भूतान्यखिलान्यमूनि ॥६२७॥

प्रत्यर्थमेतां नियतां प्रतीयाद्वेदत्रयीं नास्ति तया विनाऽर्थः ।
देहानिमान् देहिभृतानशेषान् सर्वत्र वेदत्रयमध्यतिष्ठत् ॥६२८॥

प्रत्यर्थमृक्-साम-यजूंषि वेदास्त्रयः स्वरूपाणि विशिष्य तेषाम् ।
निरूपितानि स्फुटमन्यदेशे वागेव तानीति विशिष्य विद्यात् ॥६२९॥

त्रय्योपपन्नस्त्विह विद्यतेऽर्थस्त्रय्यैव विन्दत्यपि वेत्ति चार्थम् ।
तस्मात् त्रयीं तां प्रवदन्ति वेदं वेदे हि सर्वं प्रतितिष्ठतीदम् ॥६३०॥

ऋक्सामवेदौ सृजतो न किञ्चिद्वाय्वन्तरिक्षं हि यजुस्तु यज्जूः ।
आकाशरूपा प्रथमं त्वियं वाक् वायुत्वमायाति घनीभवन्ति ॥६३१॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यावन्ति भूतान्यभवन्निहैषां या प्रागवस्था स हि वायुरुक्तः ।
तेजस्तथापोऽन्नमिति त्रयाणि भूतानि तेषां द्विविधा अवस्थाः ॥६३२॥

उक्त्यानि रूढाः प्रथमा अरूपाः, स्युर्योगिकास्तूत्तरतः सरूपाः ।
यदग्नयोऽम्भांसि मृदश्च दृश्यान्येतानि वायुद्वययोगजानि ॥६३३॥

यान्यग्नयोऽम्भांसि मृदोऽप्यदृश्यान्येतानि तत्त्वानि तु वायवस्ते ।
वाय्वात्मनैतानि पुरस्तु भूत्वा दृश्यात्मनैतानि भवन्ति पश्चात् ॥६३४॥

आकाशतो वायुरतश्च तेजो जलं च पृथ्वीति वदन्ति केचित् ।
वाचोऽभवन्नाप इति स्म केचिन्नेक्षामहे विप्रतिपत्तिमत्र ॥६३५॥

यां वाचमाकाशमिति प्रविद्मस्त्रयीमयी साऽथ यजुस्तु सोऽग्निः ।
आकाशरूपश्च स वायुरूपः पुरश्चरत्यस्य च कश्चिदग्निः ॥६३६॥

पुरश्चरन् योऽग्निरुदेति वायोः स वायु-खाभ्यां सहितो यजुःस्यात् ।
यजुःस्वरूपा जनयत्यसौ वागयोऽग्निजास्ता अपि वायुजास्ताः ॥६३७॥

वागेव साप्नोदखिलं ततस्ता आपोऽभवन् वाग्विकृतिस्वरूपाः ।
अप्स्वेव बीजं प्रससर्ज बीजादस्मादभूद्भौतिकपिण्डजन्म ॥६३८॥

वागात्मकायोमयभूतपिण्डो देहोयमात्मान्नमयोऽस्ति बाह्यः ।
प्राणोन्तरात्माऽथ मनोऽत्र मुख्योस्त्यात्मा त्रिमूर्तिस्त्विह भूतसर्गः ॥६३९॥

देही यदा देहमुपेत्य बद्धो देहान्तरादाहरते स्वभोगम् ।
स भूतसर्गः स च बद्ध आत्मा हृद्ग्रन्थिराबन्धनयोनिरस्मिन् ॥६४०॥

त्रिधा विभक्तोऽस्ति स भूतसर्गो दैवः पशुः स्थावर इत्यवेहि ।
हिरण्यगर्भप्रमुखा मनुष्यादयश्च वृक्षप्रमुखाः क्रमात् ते ॥६४१॥

अण्डात्मकास्तत्र हिरण्यगर्भाः पिण्डाश्चरन्तः पशवः ससंज्ञाः ।
भूद्भेदजाः स्थावरभूतसर्गा अन्नं तु पूर्वस्य परं परं स्यात् ॥६४२॥

देवेऽधिकाः प्राणमनोऽग्निमात्रा अत्यल्पमापोमयभूतभागः ।
प्रभूतभूतैर्मनसोऽतिमान्द्यात् स्युः स्थावरा जन्तुषु तूभये स्तः ॥६४३॥

दैवसर्गः ।

दैवं तु सर्गं प्रथमं वदामो हिरण्मयाण्डानुगता हि देवाः ।
प्राणोऽयमप्सु प्रतिपद्य विद्यात्त्रय्या व्यधत्तात्र हिरण्मयाण्डम् ॥६४४॥

त्रयीमयी वागिह यावदश्नुते चित्योऽयमग्निः स हि सप्तपूरुषः ।
प्रजापतिः सोऽप्सु कृतोऽस्ति तेन च ब्रह्मा स नारायण इत्यनूच्यते ॥६४५॥

सोऽग्निर्यजुर्नाम यतोऽस्त्यरूपो वाहिस्वभावः पवतेऽन्तरिक्षे ।
तस्मात्स वायुर्नयनान्नरस्तत्सुतास्तु नाराः प्रसृता इहापः ॥६४६॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नारा अमुष्यायणमस्ति तस्मान्नारायणः सोऽण्डगतः प्रजेशः ।
आपोमयः सोस्ति हिरण्मयो वा सवाङ्मयः प्राणमनोमयश्च ॥६४७॥

न वाङ्विना प्राणमुदेति नो वा प्राणः कदाप्येष मनोऽन्तरेण ।
तद्वाङ्मयः प्राणमयः स नारायणो ध्रुवं भाति मनोमयोऽपि ॥६४८॥

यस्तावदव्यक्ततरोऽयमग्निश्चिते निधेयेन सयुक् सचित्यः ।
तस्मादभूद्भूतमयस्तु चित्यो व्यक्तः स नारायण इत्यनूक्तः ॥६४९॥

चिते निधेयस्त्वमृतोऽस्ति तत्सत् चित्यस्त्वसद्भूतविकारयोनिः ।
असच्च सच्चेत्युभयात्मको यस्ततोऽभवद् ब्रह्मण उद्भवोऽस्य ॥६५०॥

अव्यक्तनाभेः प्रसृतोऽयमग्निर्यावद्बलं ता अप आबिर्भाति ।
आपोमयं तच्च हिरण्मयाण्डं तावत्प्रमाणेन बिर्भाति रूपम् ॥६५१॥

पुरश्चरत्येष यजुष्षु योऽग्निर्वैश्वानरो नाम ससोऽप्सु तिष्ठन् ।
नारायणस्तेन सयुक् तु वायुः सूत्रात्मकः सोऽस्ति हिरण्यगर्भः ॥६५२॥

हिरण्यगर्भः प्रथमोऽस्ति भूतग्रामोऽखिलं तत्र विलोकयामः ।
हिरण्यगर्भः समवर्ततात्रे भूतस्य जातः पतिरेक आस्ते ॥६५३॥

अग्नेर्बलं संचरणेऽस्ति यावत् तावत्य आपोऽग्निकृतोपनाहाः ।
शरीरमेतस्य हिरण्यगर्भस्यात्मा तु नारायण एव सोऽग्निः ॥६५४॥

हिरण्यगर्भस्य शरीरमण्डं संवत्सरस्तस्य परिप्लवोऽग्नेः ।
नाभिं च पृष्ठं च यदन्तरेण क्रमेत सोऽग्निः स परिप्लवोऽस्य ॥६५५॥

संवत्सरेणैष हिरण्यगर्भः स्वयं द्विधा स्वं विदधे शरीरम् ।
नाभेस्तु सूत्रात्मन ऊर्ध्वमेकं पार्य्यं ततोऽधस्तदवार्य्यमन्यत् ॥६५६॥

पार्य्यं तु भागं दिवमाह पृथ्वीमवार्य्यभागं च दिवस्पृथिव्योः ।
मध्ये स्थितस्ते जन एष ते द्वे उत्तेजयन् योजयते दृभँश्च ॥६५७॥

ज्योतिः परं सूर्य्य स युग् भवेद्द्यौर्भूमिर्भवेच्चन्द्र सयुक् तु पृथ्वी ।
अन्तस्तयोर्व्योम यदस्ति तस्मिन् स ते जनः सूत्रमिवास्त्यदृश्यः ॥६५८॥

त्रैलोक्यमेतत्सहयुक्तमेकं स्यादण्डमेषोस्ति हिरण्यगर्भः ।
लब्ध्वा जनुर्जीवति नंक्ष्यतीति प्राणी मतश्चेतन एष देही ॥६५९॥

हिरण्यगर्भे बहवोऽत्र जीवा वसन्ति देवा इति ते निरुक्ताः ।
यो विश्वकर्मा बुध एष वेनः शुक्रोऽङ्गिरा भूरनलस्तु भौमः ॥६६०॥

बृहस्पतिस्त्वाङ्गिरसः शनिस्स्याद्वैवस्वतस्तद्वदिहापरेपि ।
सन्त्येव देवा बहवस्त एतेऽप्येकैकजीवाः पृथगण्डरूपाः ॥६६१॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पशुसर्गः।

स प्राणिसर्गे प्रथमोऽस्ति काण्डो द्वितीयकाण्डः पशुसर्ग एषः।
तत्रापि नाभेरमृतं यद्वूर्ध्वं सा द्यौरधस्तात् पृथिवीति विद्यात् ॥६६२॥

त्रैलोक्यरूपं तदिदं शरीरं त्रैलोक्यभक्ता इह सन्ति देवाः।
अमुत्र यद्यत् तदिहापि विद्यादाकारनिर्माणविधौ तु भेदः ॥६६३॥

शुक्रस्य रक्तस्य च संनिकर्षे संदर्भणं सूत्रमुपैति मध्ये ॥।
असृक् समिद्धाग्निषु शुक्रसोमाहुतौ तयोर्योगकृते स्वभावात् ॥६६४॥

स सूत्रमात्मा स्वयमेव चक्रे द्विधा परत्रैव निजं शरीरम्।
तत्रोत्तरं पार्य्यमवार्य्यमत्राधरं द्वयं कृत्स्नवपुर्निविष्टम् ॥६६५॥

प्राज्ञः सयुक् तैजसतो भवेद् द्यौर्महांश्च भूतात्मसयुक् तु पृथ्वी।
प्राज्ञः परज्योतिष एति सूर्य्यात्सतैजसोऽथैष महांस्तु चन्द्रात् ॥६६६॥

भूतात्मसंभूतिरिति पृथिव्याः सूत्रं तु संदर्भकरं चतुर्णाम्।
क्षेत्रज्ञ आत्मास्त्युभयः स पर्ययः कर्मात्मसंज्ञं तदवार्य्ययुग्मम् ॥६६७॥

वाक् प्राणकृत्यामुदसन्मनोऽस्मिन् सूत्रं स आत्मा वयमुद्बर्हं।
स तैजसं पत्यमिहैव संस्थं क्षेत्रज्ञसज्ञं मन इत्यवेयात् ॥६६८॥

यदोंपरज्योतिषि यच्च भास्वत्यहस्तदेवाहमिहाबभूव।
एषोऽहमस्मीत्यभिमान एवात्र ज्योतिषो वृत्तिरहर्वदस्ति ॥६६९॥

क्षेत्रज्ञमुद्भाव्य मनःस्वरूपं महान्तमुद्बर्हति सत्वसंज्ञम्।
भूतात्मनाश्लिष्टतरस्त्ववायोर्महानयं संक्रमतेत्र पार्य्ये ॥६७०॥

क्षेत्रज्ञ आत्मापि मनोमयोयं महानपिच्छादति किन्तु तत्र।
ज्योतिः स्थिरं सव्यवसायमन्यद् विकल्पवत्त्वव्यवसायमन्यत् ॥६७१॥

स्वतःप्रकाशं तु मनोऽत्र सौरं सूत्रात्मनि व्यान इहोपसन्नम्।
चान्द्रं तु सौरप्रतिबिम्बयोगादाभासते तत्र महन्मनोऽपि ॥६७२॥

परप्रकाशं तु महत्तदित्थं त्रेधास्ति सत्त्वं च रजस्तमश्च।
आभाति सत्त्वं प्रतिबिम्बसत्त्वात् तमस्तदा भाति न योऽस्य भागः ॥६७३॥

सान्ध्यस्तु भागोऽस्य रजोऽनुरक्तं भासा तमो भाति न भाति चेति।
तमःप्रकाशाधिकभागयोगादुद्यंति तत्रासुरदैवभावाः ॥६७४॥

त्रैगुण्यवानेष महानमुष्य क्षेत्रज्ञनाम्नो भवति स्वभावः।
क्षेत्रज्ञ आत्मा विषयावभासो भासा गृहीतस्तु महान् स भावः ॥६७५॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

श्रद्धेति सौम्या अप आह नाम्ना श्रद्धामयोऽयं पुरुषो महान् स्यात् ।
श्रत् सत्यमाहस्थितिरेव सत्यं श्रद्धास्थितिः स्यात्परिणामिनोऽर्थे ॥६७६॥

यथा यथा पश्यति तस्य मूर्तिर्महान् भवत्येष हि भावमूर्तिः ।
तद्रूपतायां स्थितिरेव श्रद्धा, श्रद्धां गतस्तन्मयतामुपैति ॥६७७॥

चान्द्रो रसो येन युनक्ति सद्यस्तद्रूपतामेति निसर्ग एषः ।
यद्रूपतामेति महान् स भावः क्षेत्रज्ञभास्योस्ति ततोऽस्य स स्वः ॥६७८॥

शान्तिः सुखं, क्षोभणमेव दुःखं, दुःखातिशायित्वमिहास्ति मोहः ।
महत्कृतं तद्विषयावभासे क्षेत्रज्ञवृत्तित्रयमेव भोगः ॥६७९॥

कर्मत्वदृष्टं न यतोऽत्र सृष्टं क्षेत्रज्ञ आत्मा न ततोस्ति भोक्ता ।
महांस्तु कर्माशय एष भोक्ता क्षेत्रज्ञयोगात्विह भोगसिद्धिः ॥६८०॥

क्षेत्रज्ञ एषोऽस्ति चिदेव सोऽयं विकासयत्येव न सज्जतेऽर्थे ।
स्वतोऽप्रकाशस्तु महान् न भोक्ता भोक्ता चिदाभासवशान्महान् स्यात् ॥६८१॥

भोक्ता महानेव तथापि तस्मिन् क्षेत्रज्ञ आरोपितभोक्तृतोक्ता ।
कर्माशयो ज्ञानमयस्तु भूत्वा भोक्ता चिदाभासमयो महान् स्यात् ॥६८२॥

क्षेत्रज्ञभोगाः स्वत एव न स्युर्महत्कृतास्ते तत एव कृत्वा ।
क्षेत्रज्ञभोगप्रकृतिं महान्तं क्षेत्रज्ञपुंसः प्रकृतिं वदन्ति ॥६८३॥

कामो हि संस्कारमयो विचित्रोत्युच्चावचो वातयते महान्तम् ।
सा वासना तद्बललब्धवृत्तिर्महांश्चिदाभासगतिं तनोति ॥६८४॥

स तैजसः प्राज्ञ इति द्विरूपः क्षेत्रज्ञ आत्मा मन इत्यनूक्तः ।
त्रयोऽग्नयोऽत्र द्विविधोऽत्र सोमस्ते पञ्च देवा इह तैजसः स्यात् ॥६८५॥

तद्दैवयोगाद्धृदि मानसाख्ये पञ्चैव देवाः सुषयो भवन्ति ।
तानीन्द्रियाणि त्रिगुणानि तस्मिन्महत्यवाप्यें सहसोद्भवन्ति ॥६८६॥

कर्माशयः स त्रिगुणो महान् यो भूतात्मनात्यर्थमनुप्रसक्तः ।
क्षेत्रज्ञसंयोगवशात्तु तस्मिन् स्युरिन्द्रियाण्यत्र च भोगसिद्धिः ॥६८७॥

भूतानि पञ्चात्र महांस्तु षष्ठः षण्मात्रिकं रेत ऋतोरुदेति ।
क्षेत्रज्ञमात्रासु निवेश्यमात्राः षट्ता हि मूर्तिं प्रकारोति सूत्रम् ॥६८८॥

क्षेत्रज्ञनामायममूर्त आत्मा षाट्कौशिकी तस्य हि मूर्तिरेषा ।
उत्पद्यते, तां च शरीरमाहुर्महद्धि भूतानि च तां श्रयन्ते ॥६८९॥

सूत्रं तु संदर्भति दिव्यभौमांस्तदव्ययं चाखिलभूतकृच्च ।
महान्ति भूतानि सतैजसश्च प्राज्ञोऽत्र सूक्ष्मावयवैर्विशन्ति ॥६९०॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मनो महान्भूतविधा इतीमे सप्ताणुमात्राभिरजा निजाभिः ।
संभावयन्ति व्ययमव्ययेऽस्मिन् संसृज्य सूत्रात्मनि मूर्तिमन्तम् ॥६९१॥

त्रीण्येव भूतानि भवन्ति तेजोऽबन्तानि तेषां त्विह वायवोऽन्ये ।
वाचोऽभवन् वाक् त्रिविधा यजुर्वा ऋक् साम वाऽऽसां यजुषस्तु सृष्टिः ॥६९२॥

आत्मा हि वाक्प्राणमनांसि, वाक् सा वेदत्रयी, तत्र च भूतसंस्था ।
मर्त्येऽमृतं तद्धि यतोऽस्ति बुद्धिर्वेदत्रयी तद्धचमृतं स्वरूपम् ॥६९३॥

भूतात्मनामा च महांश्च सूत्रं सतैजसः प्राज्ञ इतीह पञ्च ।
आत्मान एकत्वमवाप्य मूर्तिं तामेकतन्त्रेण निवाहयन्ति ॥६९४॥

यः सूत्रमात्मा स इहास्ति मुख्यस्ततः स पाय्येंण युनक्त्यवार्य्यः ।
कर्मात्मनि ज्ञानमुदेति पार्य्यात् ज्ञानात्मनः कर्म भवत्यवार्य्यः ॥६९५॥

करोत्यवार्य्यं तु भुनक्ति पार्य्यं सूत्रं न किञ्चित् कुरुते न भुङ्क्ते ।
निर्लेपमस्पर्शमसङ्गमेतन्न सज्जते न व्यथते सिनोति ॥६९६॥

आसक्तिमानेष महान् स चान्द्रो जानन् यथायं कुरुते तयास्मिन् ।
अदृष्टमुत्पद्यत एव कर्मैतदुच्यते संस्करणं तदस्य ॥६९७॥

सूत्रं तु तत्तेजनमेव नास्मिन् संस्कारकर्मोदयशक्तिरस्ति ।
अदृष्टकर्मानुदयात्तु नैतल्लिप्येत्तु तन्नो कुरुतेऽपि कुर्वत् ॥६९८॥

सूत्रं हि न ज्ञानमयं न तस्मात्सुखस्य दुःखस्य च तत्र भोगः ।
मनुस्तु शुद्धं विषयावभासेऽप्यसंगतः सूत्रवदेव वेद्यम् ॥६९९॥

क्षेत्रज्ञतो नैष महांस्तु युङ्क्ते तमः समाश्रित्य चिरं स्थितश्चेत् ।
स सेन्द्रियः कर्म करोति न स्वं सूत्रं तदोत्क्रामति मूर्तितस्तत् ॥७००॥

भूत्वाणुमात्रः स महानिहात्मा बीजं यदि स्थास्नु चरिष्णु चेदम् ।
समाविशत्यत्र पृथक्तया चेत् सूत्रं तदोत्क्रामति मूर्तितस्तत् ॥७०१॥

संदर्भणं प्राणनमस्य सूत्रस्यापाननं तूत्क्रमणं शरीरात् ।
अपानिति प्राणिति वा यतस्तत् तद्वेद यो जीवनमस्य दीर्घम् ॥७०२॥

अथाण्ड-सर्गः

ब्रह्माण्डपिण्डो द्विविधः परोऽभूदेको मनः प्राणमयः पृथक् सः ।
प्राणेन वाचा च कृतो द्वितीयो गौणानि तत्रान्यरजांसि सन्ति ॥७०२॥

ब्रह्माण्डपिण्डो द्विदिधोऽवरोऽभूत् सोमेन चाद्भिश्च कृतः स एकः ।
अद्भिः पृथिव्या च कृतो द्वितीयो गौणानि तत्रान्यरजांसि सन्ति ॥७०४॥

मनोमयं ब्रह्म विदुः परस्तात् त्रयीमयो वाङ्मय एष सूर्य्यः ।
चन्द्रोऽस्ययं सोममयोऽथ पृथ्वीं यामध्यतिष्ठाम तु मृन्मयी सा ॥७०५॥

अथान्तरेणास्ति हि तौ च तौ च वायुप्रबन्धः स च पञ्चमः स्यात् ।
तदित्थमण्डानि मतानि पञ्चान्योन्यानुषङ्गैधितविग्रहाणि ॥७०६॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मुख्याण्ड-रेतोऽण्ड-बृहद्यशोण्ड-परोण्ड-पोषाण्डविभेदतः स्युः ।
पञ्चापि तान्यत्र पराण्डमाहुर्मनोमयं सर्वत उत्तमं यत् ॥७०७॥

मुख्याण्डमेषा पृथिवी यशोऽण्डं सूर्य्योऽस्ति रेतोण्डमयं हि चन्द्रः ।
यदस्ति त्वेषामिदमन्तरं तत् पोषाण्डमाहुः कृतवायुरूपम् ॥७०८॥

रेतोण्डसंघाः प्रचरन्ति यस्मिन्नेकं तु मुख्याण्डमिदं वदामः ।
मुख्याण्डसंघाः प्रचरन्ति यस्मिन्नेकं यशोण्डं तदिदं विलोके ॥७०९॥

एवं यशोण्डानि बहूनि यस्मिंश्चरन्ति तन्नाम पराण्डमाहुः ।
पोषाण्डमेतान्युभयानि पुष्यत् स्तभ्नाति संदर्भति वायुरूपम् ॥७१०॥

चन्द्रेण साकं पृथिवीयमेतं सूर्य्यं परिक्रामति सूर्य्य एषः ।
साकं पृथिव्या तु मनोमयं तज्ज्योतिः परिक्रामति योऽखिलात्मा ॥७११॥

केचिन्मनोऽण्डात् परतोऽपि सूर्य्यं वदन्ति विज्ञानमयाण्डदेवम् ।
तदूर्ध्वमप्येकमनन्तमन्त्यं प्रशान्तमानन्दमयं वदन्ति ॥७१२॥

भवेदिदं किन्तु न वेद्मि सम्यक् स्वरूपमूर्ध्वं द्वितयस्य तस्य ।
तस्मान्निरस्य द्वितयं तदूर्ध्वमयामनोऽण्डप्रभृतीदमुक्तम् ७१३॥

भावा अभूवन्नव ये त्वमीषां तिस्रो दिवस्तिस्र इमाः पृथिव्याः ।
तदन्तरे च त्रयमन्तरिक्षं तदन्तरे तिष्ठति मातरिश्वा ॥७१४॥

ज्ञाप्राणवेदास्त्रय उत्तरा द्यौर्मृत्तोयसोमा अधरा तु पृथ्वी ।
आकाशवाय्वग्निहृदन्तरिक्षं प्राणस्त आपोऽथ च वायवस्ते ॥७१५॥

आकाशवाय्वग्निघनःपरस्मिन्नपो दधात्यप्सु दधाति चासून् ।
संस्तभ्य तिष्ठत्ययमन्तरेतानव्यक्तमूर्त्तिर्नव सूत्ररूपः ॥७१६॥

तथाण्डसृष्टावपि यानि चत्वार्य्यण्डानि सुव्यक्ततराण्यभूवन् ।
ज्योतिःपरं तत्र मनोमयाण्डं तदन्वयं प्राणमयोस्ति सूर्य्यः ॥७१७॥

तमन्वियं भूम्यपि वाङ्मयी सा मनोमयस्तामनु चन्द्र एषः ।
चत्वार एते क्रमसंनिविष्टा व्यक्तश्रियो विश्वसृजः प्रथन्ते ॥७१८॥

द्वयोर्द्वयोरत्र विभागमन्यः करोति यस्तिष्ठति पञ्चमोऽन्तः ।
ज्ञाप्राणयोस्तेन सयुक्त्वमित्थं भूचन्द्रयोरव्युदिनं सयुक्त्वम् ॥७१९॥

द्यौरेतदूर्ध्वद्वितयं हि पार्य्यं पृथ्वीत्वधस्ताद्द्वयमस्त्यवार्य्यम् ।
[1]यदन्तराद्यां पृथिवीं च क्लृप्तं तत्तेजनं स्यादिदमन्तरिक्षम् ॥७२०॥

यदुत्तरस्मिन्नपि मातरिश्वा दधात्यपस्तेन चतुर्षु भौतम् ।
शरीरमस्त्येवमिहापि धत्ते देवांस्ततः प्राणमयं हि विश्वम् ॥७२१॥

---

[1] यथाद्यां च पृथिवीं चान्तस्तिष्ठति तेजनम् । (अथ० मं० १।१।२।) तेजनमुत्तेजकमित्येकोऽर्थः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



१ मनोमयाण्डे मूर्तिरस्ति वा नास्ति वेति सन्दिग्धम्। परिचर्य्य मूर्तिर्नास्तीत्यतो गतिर्नास्ति। व्याप्ति-सीमामण्डलं नास्ति; अनवच्छिन्नत्वात्। तदन्तश्चराः परिचरपिण्डाः सूर्य्या उच्यन्ते। आत्मधर्म्मः प्रज्ञः। तदण्डस्य प्रज्ञामयत्वात् ॥१॥

२ एवं प्राणमयाण्डे सूर्य्यो मूर्त्तिः। परज्योतिः पिण्डं परितो नियते मार्गे गतिमण्डलम्। बृहत्सामास्य व्याप्तिमण्डलम्। तैजसः प्राण आत्मधर्म्मः; तदण्डस्य तन्मयत्वात्। अन्नश्चराः परिचरपिण्डाः पृथिव्यादयो ग्रहपिण्डाः सुपर्णाः ॥

३ परिचर्य्यमूर्तिस्तु परज्योतिर्मनोमयः पिण्डः। तं परितः सूर्य्यपरिभ्रमणात् ॥२॥ अथ वाङ्मयाण्डे पृथ्वीमूर्तिः। सूर्य्यं परितो नियते मार्गे गतिमण्डलम्। रथन्तरसामात्र व्याप्तिमण्डलम्। वैश्वानरो भूतात्मा आत्मधर्म्मः; अण्डस्य तन्मयत्वात्। अन्तश्चराः परिचरपिण्डाश्चन्द्रा उच्यन्ते। परिचर्य्य-मूर्तिः सूर्य्यः; तं परितोस्याः परिभ्रमणात् ॥३॥

४ अथ सोममयाण्डे चन्द्रो मूर्तिः। पृथ्वीं परितो गतिमण्डलम्। सूत्रात्म पर्यन्तं व्याप्तिमण्डलम्। महानात्मा आत्मधर्मः; अण्डस्य तन्मयत्वात्। अन्तश्चरा गन्धर्वा अदृष्टपिण्डाः सन्ति न सन्ति चेति संदिग्धम्। परिचर्य्यमूर्तिः; पृथ्वी तां परितश्चन्द्रभ्रमणात् ॥४॥

५ पोषाण्डे तु मध्यमे न मूर्ति, नंगति, नं व्याप्तिसीमा, न परिचरा, न परिचर्य्याः। केचलमात्मधर्म्मः सूत्रात्माऽभिधीयते। तेनेदमण्डं परिव्याप्तम् ॥ इत्थमण्डेषु मण्डलान्यवसेयानि ॥

चि० सं० ११ श्लो० सं० ७०७ पृ० सं० ५६

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पञ्चभ्य एभ्योऽप्यतिरिक्तमेकं ब्रह्माण्डमस्तीत्यनुभावयामः ।
यत्रांशतोऽण्डानि तु तानि पञ्चाप्याविश्य तद्रूपतया स्थितानि ॥७२२॥

षष्ठं तदण्डं तु शरीरमाहुश्चत्वार एतस्य भवन्ति भागाः।
आब्रह्मरन्ध्रादयमाचकण्ठादाहृत्प्रदेशादयमाच नाभेः ॥७२३॥

या ब्रह्मणो ग्रन्थिरिहास्ति यौनौ यद् ब्रह्मरन्ध्रं शिरसि प्रदृष्टम् ।
तदन्तरेऽण्डानि चतुर्विधानि प्रक्षे मनःप्राणतदन्नशुक्रैः ॥७२४॥

यदन्तरेषां हृदयं तदस्ति व्यानेन सूत्रेण कृताधिकारम् ।
विश्वाण्डमाक्रामति मातरिश्वा देहाण्डमाक्रामति यो मनुः सः ॥७२५॥

सर्वप्रशास्ताऽस्त्यणुरप्यणूनां रुक्मप्रभः स्वप्नधियाऽवगम्यः ।
यः पूरुषोऽसौ मनुरुच्यते स प्रजापतिः प्राण उताग्निरिन्द्रः ॥७२६॥

वैवस्वतोऽयं मनुरागतो यो विवस्वतोऽस्मिन् वपुषि प्रविष्टः ।
विश्वाण्डगस्त्वेव मनुः स्वयंभूस्तत्रैष आत्मा तु विवस्वतोऽभूत् ॥७२७॥

मूर्तिर्गतिर्व्याप्तिरथात्मधर्म्मा येऽन्तश्चरायापरिचर्य्यमूर्तिः ।
षडित्थमण्डेषु भवन्ति भावा अवेत्य तानण्डमवैति सम्यक् ॥७२८॥

मूर्तिस्तु पृथ्वीगतिरस्ति पृथ्व्या नियम्य सूर्य्यं परितः समन्तात् ।
व्याप्तिस्तु तत्सामरथन्तराख्यं वैश्वानरः स्यादिह चात्मधर्मः ॥७२९॥

अन्तश्चरश्चन्द्र इहाण्डमध्ये सूर्य्यस्तु तस्याः परिचर्य्य आत्मा ।
प्रत्यण्डमित्थं षडिमेपि भावा ऊह्याः क्वचित्तत्र न सन्ति केचित् ॥७३०॥

रेतोण्ड-मुख्याण्ड-यशोण्डसंघाः सहस्रशः स्युः परमाण्डगर्भे ।
सर्वेऽपि तत्रैव वसन्ति तारा पिण्डा इमे विश्वमियत् समस्तम् ॥७३१॥

सहस्रशः सोमरजांसि चाग्नेः रजांसि भिन्नप्रकृतीनि सन्ति ।
ततश्च पृथ्वीरविचन्द्रतारा भिन्नस्व ावा बहवो भवन्ति ॥७३२॥

नानाविधैरेव रजोभिरेतान्यण्डानि पूर्णानि विनिर्मितानि ।
सर्वे त एते रजसां निकायास्तस्माद् रजांस्येव जगत् समस्तम् ॥७३३॥

इत्याण्डसर्गः समाप्तः ॥

अथ त्रैलोक्यप्रभेदाः ।

त्रैलोक्यमेतद्दशभेदमाहु[1]र्भौत्या[2]ण्डकेमाण्ड[3]लिकाह्विके[4] च ।
[5]ब्राह्मं च [6]कौर्म्मं च पुराणदृष्टं[7] पृष्ठचं[8] च दिव्यं[9] च तथैव भौमम्[10] ॥७३४॥

भौत्यं द्विधाऽवान्तरमुख्यभेदाद् व्याख्यातमादाविह भूतसर्गे ।
उत्तेजनं पार्य्यमवार्य्यमित्थं पञ्चाण्डसर्गे पृथगाण्डमुक्तम् ॥७३५॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सर्वासु दिक्षु प्रतरन्ति यावज्ज्योतींषि विश्वाधिपतेः परस्य ।
पराण्डमुक्तं हि तदित्थमेवाण्डानि प्रविद्यादपराणि तत्र ॥७३६॥

ज्योतिः परं ब्रह्म तदुच्यते परं यद्वचोम्न्यसीमे परमे प्रतिष्ठितम् ।
तत्सूर्य्यवज्ज्योतिरमुष्य सूर्य्यवत् प्रजापतिः प्राह विसर्पिणः करान् ॥७३७॥

"ब्रह्मसूर्य्यसमं ज्योतिर्द्यौः समुद्रसमं सरः ।
इन्द्रः पृथिव्यै वर्षीयान् गोस्तु मात्रा न विद्यते" ॥७३८॥

(यजुः सं० २३ अ० ४८ मं)

सूर्य्यो यथाहोभिरयं कृतात्मा संवत्सरोऽहर्मय दूष्यतेऽस्य ।
यज्ज्योतिषां ज्योतिरिदं तथायुः संवत्सरं पश्यति याज्ञवल्क्यः ॥७३९॥

"यस्मादर्वाक् संवत्सरोऽहोभिः परिवर्तते ।
तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम्" ॥७४०॥

(बृ० आ० ४।४)

यदेतदत्रामृतमायुरुक्तं प्रज्ञामयः प्राण उतायमिन्दुः ।
तज्ज्ञानमेवास्ति हितं जनेभ्यः कौषीतकिः प्राह तदस्ति सत्यम् ॥७४१॥

माण्डलिकं त्रैलोक्यम् ।

सूय्यश्च पृथ्वी च तदन्तरिक्षं त्रैलोक्यमेतत्पृथगामनन्ति ।
मनोमयं ज्योतिरतः परं यत् तस्मात् त्रिलोकातिगतं तदाहुः ॥७४२॥

ज्योतिस्त्रिलोकातिगमेकमास्ते लोकत्रयाण्यत्र बहूनि तु स्युः ।
अनेकतामाह विरूप एषामसंख्यतामाह च वामदेव्यः ॥७४३॥

परस्या अधि संवतोऽवरां अभ्यातर ।
यत्राहमस्मि तां अव ॥७४४॥ (ऋ० ८।७५।१५)

कत्यग्नयः कति सूर्य्यासः कत्युषासः कत्युस्विदापः । (ऋ० १०।८८।१८)
नोपस्पिजं वः पितरो वदामि पृच्छामि वा कवयो विद्म नेकम् ॥७४५॥

महर्षिरन्यः पुरुहन्मनान्या तासु त्रिलोकीषु बहुष्वपीन्द्रम् ।
तमेकमेवाहुरिह प्रविश्याभिव्याप्तमध्यक्षमनन्तशक्तिम् ॥७४६॥

यद् द्याव इन्द्र ते शतं शतं भूमीरुत स्युः । (८।७०।५)
न त्वा वज्रिन् सहस्रं सूर्य्या अनु न जातमष्टरोदसी ॥७४७॥

[1]रजो हि लोको रजसो हि सृष्टी रजांसि तु त्रीणि सनातनानि ।
द्यावापृथिव्यौ च तथान्तरिक्षं लोकत्रयं वाङ्मयमेतदस्ति ॥७४८॥

प्रत्येकमेषु त्रिविधा विभागा अशीतिरुक्थोऽर्क इति प्रभेदात् ।
उत्तिष्ठतेऽर्कादि यतस्तदुक्थं स्थित्वात्र योर्वश्चरतीह सोऽर्कः ॥७४९॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



श्भौत्यंत्रैलोक्यम्

चि० सं० १२ श्लो० सं० ७४८ पृ० सं०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



आण्ड त्रैलोक्यम्

चि० सं० १३ श्लो० सं० ७४८ पृ० सं० ५८

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

येनाश्नुत्तेऽर्चन्नखिलं तदन्नं सोऽश्नाति तद्धचन्नमतोस्त्यशीतिः ।
अशीतिभिः प्राणिति सोऽर्क इत्थं प्रवर्तते विश्वमनाद्यनन्तम् ॥७५०॥

व्यक्तं स्थितं वाङ्मयमुक्थमस्मिन् प्राणोऽयमव्यक्त उदेति सोऽर्कः ।
आप्यायते येन स यस्य हानेऽर्कः शाम्यतीयं तु भवेदशीतिः ॥७५१॥

यस्मिन्मनः प्राणगतोऽयमुक्थो रसो मधुस्वादमयोस्ति तर्हि ।
उत्तिष्ठतेऽस्मिन् मधु भोक्तुमिच्छा यत्नश्च नोचेन्न रुचिस्तदा स्यात् ॥७५२॥

भा भास्वति द्यौरिदमुक्थमस्मिन् य उत्तमोऽग्निः स तदन्तरर्कः ।
उक्थं पृथिव्यामपि मृत्तिकेयं यः पार्थिवोग्निः स तदन्तरर्कः ॥७५३॥

यः स्पृश्यते वायुरयं तदुक्थं यो मध्यमोऽग्निः स तदन्तरर्कः ।
व्यक्तेन्तरव्यक्त इव स्थितोऽर्कः प्राणः स भूते कुरुते त्रिकर्म ॥७५४॥

अर्कस्त्रिकर्मा कुरुते विधारणं प्रच्छर्दनं संग्रहणं निरन्तरम् ।
यद् गृह्यते यद्धियते यदुज्झ्यते साशीतिरुक्ता तदिदं त्रयं त्रिषु ॥७५५॥

लोकोऽयमुक्थं य इहास्ति सोऽर्कः प्राणो भवेदत्र स लोकपालः ।
लोकान्तरादन्नमयं गृहीत्वा धृत्वानुजीवत्यधिकं जहाति ॥७५६॥

व्यष्टया समष्टया द्विविधं विभज्य त्रयं तदुक्थादि पृथक् यथोचे ।
पुराधिदैवं तदिदं तथैवाध्यात्मं पुनः प्राह स ऐतरेयः ॥७५७॥

पृथ्वीयमुक्थं तत एव सर्वं हयुत्तिष्ठते यत्किमपीह पृथ्व्याम् ।
तस्याग्निरर्कोऽन्तमशीतयः स्युः सोऽन्नेन सर्वं न्विदमश्नुते हि ॥७५८॥

द्वितीयमुक्थं त्विदमन्तरिक्षं वायुस्तदर्कोऽन्नमशीतयः स्युः ।
द्यौरुक्थमादित्य इहार्क एवं यदन्नमस्येदमशीतयः स्युः ॥७५९॥

लोकत्रयात्मा पुरुषोऽधिदैवं प्रजापतिस्तूक्थमिहाग्निरर्कः ।
सोऽग्निः स वायुः स च सूर्य इत्थं आत्माऽश्नुतेऽन्नेन समस्तमेतत् ॥७६०॥

अर्कस्त्रिधातू रजसो विमाने सोऽग्निः स वायुः स रविः पृथक् स्युः ।
अग्नेः प्रजाः षट् प्रभवन्ति तासां वाग्वायुतेजांसि पराञ्चि जग्मुः ॥७६१॥

आपश्च पृथ्वी पशवोऽर्कमेवाभितोनिविष्टा न पराग् भवन्ति ।
सूर्य्यस्तु तस्थौ भुवनेषु मध्ये यस्त्वान्तरीक्ष्यः स विवेश दिक्षु ॥७६२॥

तमेतमर्थं भगवान् महर्षिः स भार्गवः प्राग् जमदग्निरूचे ।
अग्निं च वायुं च रविं च लोके प्रतिष्ठितं यत्र यथा ददर्श ॥७६३॥

[1]प्रजाह तिस्रो अत्यायमीयुर्न्यन्या अर्कमभितो विविश्रे । (८।१०१।१४)
बृहद्ध तस्थौ भुवनेष्वन्तः पवमानो हरित आविवेश ॥७६४॥

---

[1] प्रजाहेति । बृहत्पदमत्र सूर्य्यपरं न तु सामपरम्; अयोग्यत्वात् । सूर्य्यपरत्वं त्वस्य-मन्त्रे श्रूयते—"इदं श्रेष्ठं ज्योतिषां ज्योतिरुत्तमं विश्वजिद्धनजिदुच्यते बृहत् । विश्वभ्राड्भ्राजोमहि सूर्य्यो दृश उरु पप्रथे सह ओजो अच्युतम् । (ऋ. १०।१७०।३)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पशुष्वपि प्राणिषु चेतनेषु काश्चित् प्रजा अर्कमनु त्यजन्ति ।
तानेव केचित्तु निदर्शयन्ति न तावता मूलकथापवादः ॥७६५॥

त्रयः केशिन ऋतुथा वि चक्षते संवत्सरे वपत एक एषाम् । (ऋ० १।१६४।४४)
विश्वमेको अभिचष्टे शचीभिर्ध्राजिरेकस्य ददृशे न रूपम् ॥७६६॥

एतत्त्रयं ब्रह्म तदस्य शास्त्रं वेदः पृथिव्यामिह येऽन्तरिक्षे ।
दिव्याश्रिता ये च यथावदर्थास्तेषां हि विज्ञानमुदेति वेदात् ॥७६७॥

ये अर्वागुत वा पुराणे वेदं विद्वांसमभितो वदन्ति ।
आदित्यमेव ते परिवदन्ति सर्वे अग्निं द्वितीयं तृतीयं च हंसम् ॥७६८॥

यथाधिदैवं तदिदं तथैवाध्यात्मं द्विधा व्यस्तसमस्तभेदात् ।
महान् शरीरी पुरुषोऽयमुक्थं त्र्यात्माग्निरर्कः स इहाश्नुतेऽन्नात् ॥७६९॥

वक्षोऽन्तरिक्षं मुखमण्डलं द्यौः पृथ्वीत्वधः स्यादयमन्नकोशः ।
तेषु क्रमाद्वायुरथेन्द्र एवं सोऽग्निर्भवेदर्क इहान्तरेऽपि ॥७७०॥

मुखं तदोक्थं पृथिवीवदर्को वागत्र तस्यान्नमशीतयः स्युः ।
नासे इहोक्थं खवदत्र चार्कः प्राणो ललाटोक्थगचक्षुरर्कः ॥७७१॥

अथाह्निकम् ।

अथाह्निकी तु द्विविधा त्रिलोकी सूर्य्येऽन्यरूपा भुवि चान्यरूपा ।
ज्योतिस्तु गौरायुरिति त्रिलोकी सूर्य्ये विदुस्त्रीणि तु तान्यहानि ॥७७२॥

वाग्गौरथ द्यौरिति च त्रिलोकी पृथ्व्यां विदुस्त्रीणि च तान्यहानि ।
द्यौरन्तरिक्षं पृथिवीति सूर्य्ये पृथ्व्यन्तरिक्षं द्युरिदं पृथिव्याम् ॥७७३॥

तेषामहोरात्रविदः स्वरूपं सप्ताहवादे विशदं वदन्ति ।
विद्यात् ततस्तत्सकलं विशेषस्त्वत्रोच्यते कोऽप्यनयोः सयुक्त्वे ॥७७४॥

यथाग्निगर्भा पृथिवी तथा द्यौरिन्द्रेण गर्भिण्यपरे तु देवाः ।
अग्नीन्द्रभक्ता न ततः पृथक् स्युस्तदुद्भवास्तन्मयतत्प्रतिष्ठा ॥७७५॥

तनुत्वतापद्रवणानि पाकं दृश्यं विकारं विदुरग्निकर्म ।
प्रकाशरूपे गतिविक्रमार्था ओजो बलं वीर्य्यमपीन्द्रकर्म ॥७७६॥

परस्परभोगः ।

द्यौरन्नमेषा पृथिवी तदन्नादन्नादियं द्यौः पृथिवी तदन्नम् ।
पृथ्वी दिवं द्यौः पृथिवीं च भुङ्क्ते तेजोमयी प्राणिति न क्षिणोति ॥७७७॥

द्यां जिन्वतीयीं तु रथन्तरेण द्यौर्जिन्वतीमां बृहती तु साम्ना ।
इयं त्वमूं जिन्वति नौधसेन श्यैतेन चासावपि जिन्वती माम् ॥७७८॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

धूमेन पृथ्वी किल जिन्वति द्यामसाविमां जिन्वति किञ्च वृष्ट्या ।
पृथ्वी तु दैवं यजनं निधत्तेऽमुष्यामथासावदधादिहोषान् ॥७७९॥

ऊषो हि पोषः पशुभिः कृतो यस्तस्मादिहोषान्निदधाति योऽसौ ।
तान् वै पशूनेव दधाति पृथ्व्यामसौ द्वयोरित्थमिहास्ति भोगः ॥७८०॥

तदित्थमेतेषु रजःसु सर्वं ह्यन्नादमन्नं च परस्परेण ।
एकैकमन्यस्य भवत्यशीतिस्तयार्क उक्थेऽर्चति तेन विश्वम् ॥७८१॥

अनेकधाराभिरितो दिवं च प्रयान्त्यथा यान्ति दिवश्च पृथ्वीम् ।
पयोघृताद्या बहवो रसा यत् तद्वै भरद्वाजमहर्षिराह ॥७८२॥

असश्चन्ती भूरिधारे पयस्वती घृतं दुहाते सुकृते शुचिव्रते । [६।७०।२]
राजन्ती अस्य भुवनस्य रोदसी अस्मे रेतः सिञ्चतं यन्मनुर्हितम् ॥७८३॥

स्त्रियामिदं लोहितमग्निरूपमादित्यरूपं पुरुषेऽस्ति रेतः ।
आत्मानमन्योन्यमभिप्रदाय संभूय चैतौ सृजतोऽत्र जन्तुम् ॥७८४॥

एतन्मते द्यौस्तु पिताथ माता पृथ्वी मतोऽस्यामखिलस्य नाभिः ।
उत्तानचम्वन्तरतोऽस्य योनिस्तथेक्षते दीर्घतमा महर्षिः ॥७८५॥

द्यौर्मे पिता जनिता नाभिरत्र बन्धुर्मे माता पृथिवी महीयम् । [१।१६४।३३]
उत्तानयोश्चम्वोर्योनिरन्तरत्रा पिता दुहितुर्गर्भमाधात् ॥७८६॥

स्थिरचरविमर्शः ।

सूर्य्यः स्थिरस्तिष्ठति विश्वमध्ये चन्द्रेण साकं भ्रमतीह पृथ्वी ।
इत्थं महर्षिर्जमदग्निरूचे स वामदेवश्च स वामदेव्यः ॥७८७॥

प्रजा ह तिस्रो अत्यायमीयुर्न्यन्या अर्कमभितो विविश्रे । [८।१०१।१४]
बृहद्ध तस्थौ भुवनेष्वन्तः पवमानो हरित आविवेश ॥७८८॥

अहं परस्तादहमवस्ताद् यदन्तरिक्षं तदु मे पिताऽभूत् ।
अहं सूर्य्यमुभयतो ददर्श अहं देवानां परमं गुहा यत् ॥७८९॥

यददेनमदधुर्यज्ञियासो दिवि देवाः सूर्य्यमादितेयम् । [१०।८८।११]
यदा चरिष्णू मिथुनावभूतामादित् प्रापश्यन् भुवनानि विश्वा ॥७९०॥

सोमः पूषा च चेत तु विश्वासां सुक्षितिनाम देवत्रारथ्योर्हिता ॥७९१॥
द्यावापृथिव्योस्तु यदाह रेणुः स्तम्भं मिथस्तेन गतिर्न पृथ्व्याः ।

निषिध्यतेऽपि त्वनयोः सदैवान्तरं स्थिरं पश्यति सर्वदिक्षु ॥७९२॥
इन्द्राय गिरो अनिशितसर्गा अपः पैरयत् सगरस्य बुध्नात् ।

यो अक्षेणेव चक्रियौ शचीभिर्विश्वक् तस्तभ्य पृथिवीमुत द्याम् ॥७९३॥

एवं पृथिव्याश्च दिवश्च विश्वामित्रो यदाह स्थिरतां महर्षिः ।
भूगम्यमार्गस्थिरतामपेक्ष्यैतयोः समानान्तरतां तदाह ॥७९४॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

समान्या वियुते दूरे अन्ते ध्रुवे पदे तस्थतुर्जागरूके ।
उतस्व सारा युवती भवन्ती आदुवुवाते मिथुनानि नाम ॥७९५॥

यथा च पृथ्वी परितोंऽशुमन्तं भूयः परिक्राम्यति वत्सरेण ।
तथा स्वनाभि परितोऽहनी सा पृथ्वी च सूर्य्यश्च परिक्रमेते ॥७९६॥

न त्वेष जात्वस्तमुपैति न त्वेवोदेति यस्तिष्ठति विश्वमध्ये ।
वयं तु सूर्य्याभिमुखाः कदाचिद्भूत्वा कदाचिद्विमुखा भवामः ॥७९७॥

अह्नोऽन्तमित्वा तु विपर्य्ययन्ते स्वमेव मन्यन्त इतस्तमस्तम् ।
रात्रीमवस्ताद्दधते परस्तात् त्वहो यथास्थानमयन्तु सूर्यः ॥७९८॥

रात्र्यन्तमित्वा तु विपर्य्ययन्ते स्वमेव तेनोदितमाहुरेतम् ।
अहस्त्ववस्ताद्दधते परस्ताद् रात्रिं यथास्थानमयं तु सूर्य्यः ॥७९९॥

इत्यैतरेयो भगवानुवाच स्फुटं ततः सिद्धचति भूविवर्तः ।
पृथ्वीविवर्तेन न चेत् तदानीं न स्यादहोरात्रविपर्य्ययोऽयम् ॥८००॥

गोषूक्तिनाऽदर्श्यत चाश्वसूक्तिना काण्वायनेनाद्भुतयुक्तिरत्र सा ।
यथा स्वनाभि परितो विवर्तते पृथ्वीयमन्हा नियतान्तरिक्षगा ॥८०१॥

*यज्ञ इन्द्रमवर्द्धयद् यद्भूमिं व्यवर्तयत् चक्राण ओपशं दिवि ॥८०२॥

*वावृधानस्य ते वयं विश्वाधनानि जिग्युषः ऊतिमिन्द्रा वृणीमहे ॥८०३॥

*व्यन्तरिक्षमतिरन्मदे सोमस्य रोचना इन्द्रो यदभिनद्बलम् ॥८०४॥

*उद्गा आजदङ्गिरोभ्य आविष्कृण्वन् गुहा सतीः अर्वाञ्चं नुनुदे बलम् ॥८०५॥

विवर्तते यद्वदियं तु पृथ्वी विवर्तते यद्वदयं च सूर्य्यः ।
तत्राहनी भिन्नवदेवक्लृप्ते तथा ह्यवोचद् भगवानगस्त्यः ॥८०६॥

कतरा पूर्वा कतरा पराऽयोः कथा जाते कवयः को विवेद ।
विश्वात्मना विभृतो यद्धनाम विवर्तेते अहनी चक्रियेव ॥८०७॥

एवं भरद्वाजमहर्षिराद्योऽप्युवाच तं नाम विवर्तवादम् ।
किन्त्वेष पृथ्व्या अथवार्कपृथ्व्योर्द्वयोरितीहोभयथैव भाति ॥८०८॥

अहश्च कृष्णमहरर्जुनं च विवर्तेते रजसी वेद्याभिः ।
वैश्वानरो जायमानो न राजाऽवातिरज्ज्योतिषाग्निस्तमांसि ॥८०९॥

कृष्णाहरुर्वी रविरर्जुनाहर्द्यावापृथिव्यौ रजसी इमे ते ।
विवर्तमाने रजसी ततोऽभूत् वैश्वानरोऽग्निः स तमो निहन्ति ॥८१०॥

यद्वा भरद्वाज उवाच पृथ्वीरजोऽहरेकं तदिह द्विधाऽभूत् ॥
शुक्लं च कृष्णं च तदर्द्धमर्द्धं पर्य्यायतो जायत एतदग्रे ॥८११॥

अग्ने वैश्वानर विश्वैर्मा देवैः पाहि" (२।३।१६।४) अथर्वसंहितायां वैश्वानरस्य सर्व-देवमयत्वमाख्यातम् ।

*८।१४।५–८ ऋ०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पृथ्वीसूर्य्ययोः पौर्वापर्य्यविचारः ॥

द्यौः सूर्य्यरूपा तपतीह या वा पृथ्वी प्रतिष्ठा प्रतितिष्ठतीयम् ।
का तत्र पूर्वा, कतरा पराभूदित्थं विपृच्छास्ति विदां समाजे ॥८१२॥

तत्राग्निहोत्रे किल याज्ञवाल्क्यः प्रवक्ति पृथ्वी समभूदिहाद्रुचः ।
प्रजापतिस्तत्र य आस तस्मात् पृथ्वीरसोऽग्रेऽग्निरजायताऽग्नात् ॥८१३॥

प्राणः प्रजापत्यभिधोऽग्र आसीत् तत्रान्विता तन्महिमाऽभवद्वाक् ।
वाचोऽप उत्पाद्य तदप्सु विष्ठः पृथ्वीं ससर्जाविरभूदिहाग्निः ॥८१४॥

आसीदियं वै पृथिवी तदा काल्वालीकृता नौषधीरत्र पृथ्व्याम् ।
आसीत्तदानीं न वनस्पतिर्वा प्रजापतिं भोक्तुमगात् ततोऽग्निः ॥८१५॥

प्रजापतेर्वाग्महिमा स यः स्वः सोऽत्रापचक्राम ततोऽग्नयेऽस्मै ।
इहोषधिः सोऽन्नमभूत् ततो वाग् भूयोपचक्राम स एष सूर्य्यः ॥८१६॥

तस्मादयं वायुरभूत् तदित्थं पूर्वं पृथिव्या स ततोऽभवद् द्यौः ।
बृहस्पतेश्चाप्यदितेर्मतेसौ पूर्वं पृथिव्यास ततोऽभवद् द्यौः ॥८१७॥

पुत्रं परस्तात् पितरं त्ववस्तादृषिर्भरद्वाज इहानुवक्ति ।
तथाग्निपुत्रो वदते सकेतुर्वैश्वानराग्नेरविरुद्धबर्हं ॥८१८॥

नाहं तन्तुं न विजानाम्योतुं न यं वयन्ति समरेऽतमानाः । [६।९।२]
कस्यस्वित् पुत्र इह वक्त्वानि परो वदात्यवरेण पित्रा ॥८१९॥

अग्ने नक्षत्रमजरमा सूर्य्यं रोहयो दिवि दधज्ज्योतिर्जनेभ्यः ॥८२०॥

परे ब्रुवन्तीह पुराभवद् द्यौस्ततः पृथिव्यस्ति यतस्त्रिधाग्निः ।
तेषामभूदुत्तमतोऽयमग्निर्यो मध्यमो यः प्रथमः प्रतीतः ॥८२१॥

आकाशवाय्वग्निजलक्षितिनां क्रमेण सृष्टिं वदतां न पृथ्वी ।
प्राक् सूर्य्यतः संभवतीति हेतोरग्नेरपां सृष्टिरभूत् ततोऽस्याः ॥८२२॥

* स भौवनः प्राह तु विश्वकर्मा द्यावापृथिव्यौ सह ते अभूताम् ।
गर्भे यथा संभवतीह जन्तोराशीर्षमापादतलं सहैव ॥८२३॥

* इमौ सहैवासतुरेतदग्रे लोकौ न तु द्यौः पृथिवी पृथक् स्तः ।
काले कुतश्चिद् वियतोस्तयोर्योऽन्तरावकाशस्तदिहान्तरिक्षम् ॥८२४॥

इत्थं विदुस्तित्तिरयश्च पूर्वे स याज्ञवल्क्यश्च तथा ब्रवीति ।
तेषां मते ह्येकमिदं त्रिधाऽभूदियं तथासौ वियदन्तरिक्षम् ॥८२५॥

* यन्मण्डलं सौरमदोऽस्ति तस्य ग्रहा अनेके परितः क्रमन्ते ।
यय्यैति योऽन्त्यो ग्रह येषु तावन्मितः कदाचिद् रविकाय आसीत् ॥८२६॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ज्योतिश्चयात्मा रविरेष तावान् विवर्तमानः स गतेरसाम्यात् ।
विच्छेदयंस्तीव्रगतिं निजान्त्यस्तरं ग्रहं तेन विनिर्म्ममे स्वम् ॥८२७॥

तथैव चार्वाक् च तथैव चार्वाक्–इत्थं ग्रहांस्तान् बहुधा विधाय ।
गृह्णाति तानात्मभवानिदानीमपि स्वपर्य्यन्तपथप्रचारान् ॥८२८॥

अल्पाल्पमात्रत्ववशादमीषां ज्योतिः क्रमाद्धामह्यगाद् ग्रहाणाम् ।
आत्यन्तिकाग्निक्षयतस्तु चन्द्रादयः क्रमाद् यान्ति बिनाशमन्ते ॥८२९॥

इत्थं विदुः केऽपि सहैककायात् पृथ्वीषु जाता स्ववशिष्यतेऽर्कः ।
* आरम्भणानां रजसां सहत्वाद् द्यावापृथिव्योः सह संभवोऽन्यः ॥८३०॥

कतरा पूर्वा कतरा पराऽयोः कथाजाते कवयः को विवेद ।
विश्वं त्मना विभृतो यद्ध नाम विवर्तेते अहनी चक्रियेव ॥८३१॥

इत्थं दुरूहत्वमुवाच पौर्वापर्य्येऽनयोः स्पष्टमृषिस्त्वगस्त्यः ।
यदत्र सत्यं तदिहास्ति चिन्त्यं न त्वद्य यावद् ध्रियते यथावत् ॥८३२॥

अथेतरेऽर्वाञ्च इमे त्विदानीं पश्यन्ति केचित्पुनरन्यथैव ।
केतुश्च सूर्य्यश्च मही च चन्द्रः क्रमेण चत्वार इमे भवन्ति ॥८३३॥

वियत्यकस्मादयमग्निरेतं सोमं स्वदन् प्रज्वलिति प्रसह्य ।
स आहरन् सोममतीव दिग्भ्यः क्रमाज्ज्वलत्पिण्डमधत्त नाभौ ॥८३४॥

ज्वालामयः पूर्वमभूत् स केतुर्ज्वालां स कृत्स्नां क्रमशः प्रगृह्य ।
पिण्डात्मतां याति स भाति सूर्य्यः सर्वेऽपि केतुप्रभवा हि सूर्याः ॥८३५॥

क्रमेण सूर्य्याग्निरयं ह्रसित्वा क्षारं बहिर्धास्य निधाय काये ।
अन्तर्भवन् संकुचितक्रमोऽसौ ज्वालां जहातीति भवेदियं भूः ॥८३६॥

सोमोऽन्तरे यत्र बहिश्चरोऽग्निर्भास्वान् स सूर्य्यस्तपतीममश्नन् ।
सोमोबहिर्धाऽन्तरतोऽग्निरस्याः पृथ्व्या अतैजस्विनि पार्थिवे च ॥८३७॥

यत्र त्वमुष्याः क्रमशः पृथिव्याः कृत्स्नोपि सोऽग्निः क्षयमाससाद ।
विनिःसृताग्निः स तदैष चन्द्रो विशुद्धसोमात्मक उद्बभूव ॥८३८॥

चन्द्रस्य चान्ये परितः क्रमन्ते गन्धर्वसंज्ञा अपि तानूल्काः ।
नेद्धा प्रदश्यन्त इति स्म हेतोरेतद्द्वयं नात्र विशिष्य वच्मि ॥८३९॥

गन्धर्वतामैतत्तु तु काचिदुल्का गन्धर्व आसीदपि जातु चन्द्रः ।
य एष चन्द्रः परितः पृथिव्याः पर्य्येति पूर्वं पृथिवीयमासीत् ॥८४०॥

इयं तु पृथ्वी द्युमणिः पुरासीत् सूर्यस्तु केतुः स कदाचिदासीत् ।
ये केतवः सन्ति त एव काले सूर्य्यो भविष्यन्ति परे परेऽपि ॥८४१॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

केतुस्त्वकस्मात् स्वयमेव भूत्वा कालेन सूर्य्यं सृजति क्षितिञ्च ।
चंद्रः क्रमादग्निनिरस्तकायः क्षीणोऽप्यदृश्योऽपि विलीयते खे ॥८४२॥

सूर्य्योऽग्निहेतोः पृथुलोस्ति पिण्डः, पृथ्वी ततोऽल्पास्ति ततोऽपि चन्द्रः ।
खर्वस्ततोऽप्यग्न्ययवृक्तकायाः क्षीणक्रमा यान्ति निपातमुल्काः ॥८४३॥

अग्निस्त्वहोरात्रिरयं तु सोमस्तयोर्मिथः संगनयोर्बलेन ।
पर्य्यायतोऽन्नस्त्वबहिष्ट्वयोगाच्चत्वार एते प्रभवन्ति भावाः ॥८४४॥

चिरेण पर्य्यायमुपेत्य सोऽयं सृष्टिक्रमः संप्लवते चतुष्पात् ।
सृष्टिक्रमाणां तु चतुष्पदां स्याद्देशेपि कालेऽपि बहुत्वमेषाम ॥८४५॥
इति पृथ्वीसूर्ययोः पौर्वापर्यम् ॥

ब्राह्मं त्रैलोक्यम् ॥

पृथ्वी पथा येन रवेः समन्तात् पर्य्येति तस्मात्पृथिवी बहिर्धा ।
तन्मार्गचक्रान्तरमन्तरिक्षं भास्वत्तु मन्मण्डलमस्ति तत्स्वः ॥८४६॥

पृथ्वीपथादुत्तरतो हि दैवः पन्थास्ततो दक्षिणतस्तु पित्र्यः ।
स्याद्दैवतो ज्योतिरियाद् भुवं वा स्यात् पित्र्यतो ध्वान्तमियाद्भुवं वा ॥८४७॥

ब्राह्मं प्रजापत्यनुसंहितं तत् त्रैलोक्यमुक्तं स उपैति तत्स्वः ।
विद्याप्रधानेन विधाय यज्ञं संपादितो देवरथोऽत्र येन ॥८४८॥

पश्चात् पृथिव्या अधरा हि लोकाः सूर्य्यादिमे स्युः क्रमविप्रकृष्टाः ।
उर्ध्वास्तु लोका रविभूमिमध्ये सूर्य्यं तु भिन्ते स परो हि लोकः ॥८४९॥

कौर्मं त्रैलोक्यम् ॥

भूताभिदृष्टचन्तकृतं खमण्डलं द्वेधा विभक्तं क्रियते धरातलात् ।
एकेन खण्डेन मही परेण तु द्यौः कल्प्यते ते समसंमिते उभे ॥८५०॥

दृष्टचैकया यत्र दिवं च पृथ्वी निरावृते लोकयते समन्तात् ।
कौर्म्मं तदा पश्यति काश्यपीयं त्रैलोक्यमेतद्धृतकूर्म्मरूपम् ॥८५१॥

तस्याधरं यत्तु कपालमीक्ष्यते पृथ्वी मता सा समवत्प्रतिष्ठिता ।
यदुत्तरं दृश्यत उन्नतोदरं प्रान्तानतं द्यां प्रवदन्ति ताममूम् ॥८५२॥

तदन्तरीक्षं तु यदन्तरीक्ष्यतेऽन्तरीक्षलक्ष्माम्बुदवायुविद्युतः ।
द्युलक्ष्मनक्षत्रगणा रविः शशी भूलक्ष्म तु स्थावरजङ्गमा इमे ॥८५३॥

ते सूर्य्यचन्द्रोडुगणा अवस्ताल्लक्ष्मास्ति यस्याः प्रवदामि तां द्याम् ।
पृथ्वीं तु यस्या उपरिस्थलक्ष्मा योऽग्निः प्रजा ओषधयो वनानि ॥८५४॥
[शत. १ कां ५ प्र. ५ ब्रा.]

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सूर्य्योऽयमुद्यन्नभिधावति द्यामस्तं स यन् धावति चाभिपृथ्वीम् ।
वृत्तार्द्धवद् द्यौरिह दृश्यतेऽसौ पृथ्वी समा दर्शतलानुकारा ॥८५५॥
[शत. १।५।५]

अनेन रूपेण करोति सर्वं प्रजापतिस्तेन मतः स कूर्मः ।
कश्यद्वयं पाति यतस्ततोऽसौ कश्चित्पशुः कश्यपसंज्ञ इष्टः ॥८५६॥

यः कश्यपस्तत्सदृशः स कूर्मः कूर्मस्ततः कश्यपमाहुरार्य्याः ।
स्वरूपसाम्यप्रतिपादनाय द्वयोर्मिथः पश्यति शब्दसाम्यम् ॥८५७॥

कूर्मे यथा कश्यपशब्द उच्यते स कूर्मशब्दोऽपि तथात्र कश्यपे ।
प्रयुज्यतेऽन्ये तु वदन्ति पश्यकः स कश्यपो द्रष्टरि दृश्यते यथा ॥८५८॥

इत्थं कपालद्वयमात्रमुक्तं ताभ्यां कृतं रूपमुशन्ति कूर्मम् ।
द्रव्यं शरीरोदयनं तु सूर्य्यात् पृथ्व्याश्च रेतोऽसृगिवाभ्युपैति ॥८५९॥

ऊचे चतुर्धा ह्यप ऐतरेयस्तत्रान्तरीक्ष्या हि मरीचय स्युः ।
सूर्य्यो मरीचीर्भूवनात् समस्तादादत्त एता दिवमुत्पतन्ति ॥८६०॥

आपः स्वराजो हि मरीचयस्ताः श्रूयन्त एताः पृथिवीसमुत्थाः ।
ताभिर्वपुष्मानयमस्ति कूर्मो मारीच उक्तः स हि कश्यपस्तत् ॥८६१॥

मध्वाज्यदध्याख्यरसास्त्रयस्ते सूर्य्यादजस्रं भूवि निष्पतन्ति ।
भुवः समीपे दधि तत् स्थविष्ठं घनीभवद्रूपमुपैति विश्वक् ॥८६२॥

घृतं तदूर्ध्वं द्रवरूपमुक्तं तदूर्ध्वमस्मान्मधु भास्वतोऽर्वाक् ।
रसास्त्रयस्तेऽप्सु हिता विमिश्रा निर्मान्ति कूर्म्मस्य शरीरमग्र्यम् ॥८६३॥

त्रयः समुद्रा हि रसास्त्रयस्ते तानेष कूर्म्मस्त्वनु संससर्प ।
अपो मरीचीश्च बिभर्ति तस्मात् तथाह राहूगणिगोतमर्षिः ॥८६४॥

अपां गम्यन्त्सीदमात्वा सूर्य्योऽभितापसीन्मागिनर्वैश्वानरः ।
अच्छिन्नपत्राः प्रजा अनुवीक्षस्व, अनु त्वा दिव्या वृष्टिः सचताम् ॥८६५॥

त्रीन् समुद्रान् समसृपत् स्वर्गानपां पतिर्वृषभः इष्टकानाम् ।
पुरीषं वसानः सुकृतस्य लोके तत्र गच्छ यत्र पूर्वे परेताः ॥८६६॥

पृथ्वी दधीदं घृतमन्तरिक्षं तद्वन्मधु द्यौस्त्रय एष लोकाः ।
द्यावापृथिव्यः स हि कूर्म उक्तोऽस्यात्मास्ति तावान् स रसोऽस्ति यावत् ॥८६७॥

प्राणोऽयमात्मा च शरीरमात्मा द्विधायमात्मा ध्रियते हि तत्र ।
शरीरमद्भिश्च रसैश्च कल्पं प्राणोऽस्य चादित्य इति ब्रवीमि ॥८६८॥

द्यौरन्तरिक्षं पृथिवी च सत्रा पृथ्व्यावरोधात् त्रयमीक्ष्यतेऽर्द्धम् ।
अखण्डनात् स्याददितिर्दितिस्तु स्यात् खण्डितं गौतम आह तेन ॥८६९॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अदितिर्द्यौरदितिरन्तरिक्षमदितिर्म्माता स पिता स पुत्रः ।
विश्वे देवा अदितिः पञ्च जना अदितिर्जातमदितिर्जनित्वम् ॥८७०॥

अस्यामदित्यां निहितोऽस्ति यावत् प्राणः स आदित्य इति प्रतीमः ।
स प्राण एवास्ति हि कौर्म आत्मा कूर्मं तमादित्यमतो वदन्ति ॥८७१॥

तत्रादितिः स्याद् द्विविधा स्थिरेतरा चरेतरा यत्र पुनर्वसुत्रिपात् ।
स्वस्वस्तिके स्याद् पिहिता तु रेवती स्वातीपुरः स्याददितिः स्थिरा तु सा ॥८७२॥

[1]स चायमर्थः प्रतिपद्यतेऽदितेः स्वरूपसंस्थाविषयो बहुश्रुतः ।
यथाह माध्यन्दिनसंहिताश्रुतौ दध्यङऋषिः सूनुरथर्वणः पुरा ॥८७३॥

प्राणोयमादित्य इह स्थिरो भवेद् द्यावापृथिव्यः स्थिर एष कश्यपः ।
अथेतरानुक्षणमन्यलक्षणा त्रैलोक्यकूर्म्मा अपि तत्र भूरिशः ॥८७४॥

कृत्वेदृशं रूपमयं करोति प्रजापतिः सर्वमिदं शरीरम् ।
प्राणैरमीभिश्च रसैरमीभिः क्रियन्त एतानि वपूंषि लोके ॥८७५॥

तस्मादिमं कश्यपमाह कूर्मं तस्माच्च काश्यप्य इमाः प्रजाः स्युः ।
कूर्मोयमर्थं कुरुते तमेनं द्यावापृथिव्यौ कुरुतो मतं नः ॥८७६॥

यद्वामदेवो भगवानवोचत् कूर्मस्य देवौ सयुजाविति द्वौ ।
द्यावापृथिव्यावथवाश्विनौ तौ तौ वात्र मित्रावरुणौ प्रतीयात् ॥८७७॥

"कश्यपश्य स्वर्विदो यावाहुः स युजाविति ।
ययोर्विश्वमपि व्रतं यज्ञं धीरा निचाय्य" ॥८७८॥

पौराणिकं त्रैलोक्यम् ॥

यावान् प्रदेशो हरिदश्वभासावभासते तद्विदुरर्जुनाण्डम् ।
यावत् प्रदेशे पृथिवी स्वरूपेणाभाति तत्स्यादिह कृष्णमण्डम् ॥८७९॥

द्यौरुच्यते त्वर्जुनमण्डमाद्यं पृथ्वीष्यते तत्र च कृष्णमण्डम् ।
तत्रार्जुनाण्डं क्रियते द्विखण्डं कृष्णाण्डमूलक्षितिमण्डलेन ॥८८०॥

भूमण्डलाच्छन्दितमर्द्धमर्द्धं दिवं च भूमिं च विदुः पुराणाः ।
सूर्य्यादधो भूमिरुपर्य्यतो द्यौर्द्यौर्यावती भूरपि तावतीयम् ॥८८१॥

शतार्द्धपादोऽस्ति हि किञ्चिदूनो दिवो भुवो योजनकोटिमानम् ।
प्राणस्तराः सन्ति दिवः समन्तादपांस्तराः सन्ति भुवः समन्तात् ॥८८२॥

---

[1] देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामददे नारिरसि ॥
३७ अ० १ कं ॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददेऽदित्यैरास्नासि ॥
३८ अ० १ कं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्राणप्रकाराः प्रभवन्ति देवाः रसास्तु सप्त स्युरपां प्रकाराः ।
वायुस्तराच्छन्दितविग्रहास्ते क्रमस्थिता एव भुवि क्षरन्ति ॥८८३॥

आदित्यदेवा अपि रुद्रदेवा अधस्ततः स्युर्वसवश्च देवाः ।
देवैरमीभिः कृतविग्रहं तद् द्युमण्डलं नाभिगतोऽस्य सूर्यः ॥८८४॥

भूमौ दधि क्षार[२]सु[३]रामृ[४]ताज्य[५]म[६]ध्वा[७]प एते परितः समुद्राः ।
सौम्या रसास्तेऽग्निरसाश्च सूतगन्धाभ्रकाद्याः परितः क्षरन्ति ॥८८५॥

स्याद् भूतसृष्टिः पृथिवी समग्रा कृत्स्ना तथा द्यौरपि देवसृष्टिः ।
दैवेन भौतेन विभक्तरूपे द्यावापृथिव्यौ जगतोऽस्य रूपम् ॥८८६॥

पृष्ठ्यम् ॥

इयं तु पृथ्वी परिवर्ततेऽहोरात्रेण तस्याः परिवर्तचक्रे ।
या धूस्तमा यौ भवतः खबिन्दू तत्स्थं वियन्मण्डलमस्ति पृथ्वी ॥८८७॥

संवत्सरे भूः परिवर्त्य चक्रं करोति यत्तस्य धुरा च तत्कृलृप्तौ ।
यौ द्वौ खबिन्दू अपि तत्प्रतिष्ठं परं वियन्मण्डलमस्ति हि द्यौः ॥८८८॥

यत्क्रान्तिवृत्तं विषुवं च वृत्तं ते द्वे च ताभ्यां भवतः प्रकल्पते ।
तयोश्चतुर्विंशतिभागकल्पितं यदन्तरं तन्मतमन्तरिक्षम् ॥८८९॥

श्रुतौ स्मृतौ वा पठितं न पृष्ठ्यं प्रायेण लोकत्रयरूपमेवम् ।
तथापि सूर्यस्य भुवश्च शीर्ष्णोः पृष्ठे स्थिते तेन कृतस्तदूहः ॥८९०॥

दिव्यम् ॥

दिव्यं तदन्य तु वदन्ति लोकत्रयं पुराणा ऋषयः स्वभक्त्या ।
ध्रुवान्निरक्षान्तकपालमेकं खार्द्धं त्रिभक्तं ध्रियते त्रिलोकम् ॥८९१॥

निरक्षतः स्यात् पृथिवी ध्रुवात्तु स्याद् द्यौश्चतुर्विंशतिभागकल्पया ।
द्यावापृथिव्योरनयोर्द्विचत्वारिंशन्मितं त्वन्तरमन्तरिक्षम् ॥८९२॥

स्यादुत्तरं स्यादथ दक्षिणं तत् त्रैलोक्यमित्थं द्विविधं निरुक्तम् ।
स्याद्देवयानो ह्युदगन्तरिक्षेऽवागन्तरिक्षे पितृयाणमार्गः ॥८९३॥

सुमेरुनिष्ठश्च कुमेरुनिष्ठस्तदूर्ज्वमूर्ध्वं क्रमतः प्रपश्येत् ।
तद् व्योमवादे विशदं निरुक्तं ततः प्रविद्यात् तदशेषभेदम् ॥८९४॥

* जहात्यमुं जातु न कश्यपोऽष्टमः सुमेरुमित्थं प्रवदन्ति तन्मते ।
दिव्यं च लोकत्रयमप्युपास्यते तत्काश्यपं नाम पृथक् तु कौर्मतः ॥८९५॥

---

* आरोगो[१]भ्रा[२]जः पट[३]रः पत[४]ङ्गः स्व[५]र्णरो ज्योतिष्मा[६]न् विभा[७]सः कश्यपो[८]-ऽष्टमः, समहामेरुं न जहाति- इति तैत्तिरीयारण्यके ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भौमम् ॥

भौमं च तद् दिव्यवदेव विद्यान्निरक्षमेर्वन्तरभूमिभक्त्या ।
इरावतीनिर्गमनादुदक् तु प्राहुः परे तत्र तदन्तरिक्षम् ॥८९६॥

स्वर्गे तु भौमे तदहश्च रात्रिः षड्भिश्च षड्भिर्भवतस्तु मासैः ।
भौमेऽन्तरिक्षे न कदापि सूर्यं खस्वस्तिके पश्यति कश्चिदाप्तम् ॥८९७॥

स्वर्गेऽन्तरिक्षे च पुरा वसन्तः केचिन्नरा देवपदप्रसिद्धाः ।
देवर्षयो वा पितरश्च तैरग्योनाश्वभूवन्नधुना तु नैतै ॥८९८॥

त्रैलोक्यमेतद्विदुरैतिहासिकाः पौराणिका दिव्यमिदं यथोचिरे ।
प्रसङ्गतस्ते परिकीर्तिते मया वैज्ञानिके पथ्यनयोस्तु न स्थितिः ॥८९९॥

त्रैलोक्यभेदेषु तदित्थमष्टसु द्यौः प्राणितीमां पृथिवीं ततोऽश्नुते ।
अपानिति द्यौः पृथिवीं जहात्यतः स्वतंत्रतास्याः परतंत्रताऽप्यतः ॥९००॥

पृथ्वी तथा प्राणिति तेन तां दिवं व्याप्नोति पश्चाद्विजहात्यपानती ।
तदान्तरिक्षं च ततः स्वतन्त्रवत् प्रवर्तते वा परतंत्रतोऽपि वा ॥९०१॥

इति त्रैलोक्यप्रभेदाः ॥

॥ इति रजोवादः समाप्तः ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१. हिन्दू धर्म—श्री अम्बिकादत्त उपाध्याय ३)
२. हिन्दू धर्म और आचार—श्री अम्बिकादत्त उपाध्याय ३)७५
३. गीता प्रवचन गीता व्याख्यानमाला भाग १—
म० म० पं० गिरिधर शर्मा चतुर्वेदी १५)
४. ,, ,, ,, भाग २ ७)५०
५. श्रीमद्भगवद्गीता—डा० एस० के० बेलवेलकर हिन्दी ५)
६. भगवद्गीता का आशय और उद्देश्य--डा० भगवानदास)५०
७. गीतोपदेश (गीतारवाणी का हिन्दी अनुवाद)—श्री अनिलवरण राय ३)
८. सनातन धर्मोद्धार भाग १—४ प्रत्येक ५)
९. सनातन धर्म प्रश्नोत्तरी।)१२
१०. विश्व के संत महापुरुष—डा० देवराज २)५०
११. वैदिक कोश—डा० सूर्यकान्त २२)५०
१२. प्रकरण पंचिका—ए० सुब्रह्मण्यम् शास्त्री २५)
१३. सामतन्त्रम्—ए० एम० रामनाथ दीक्षित २०)
१४. विक्रमाङ्कदेव चरितम् भाग १—श्री विश्वनाथ शास्त्री भारद्वाज ८)
१५. ,, ,, भाग २ ,, ७)
१६. ,, ,, भाग ३ ,, ७)
१७. रसगंगाधर भाग १—श्रीमधुसूदन शास्त्री १५)
१८. पुराण विषयानुक्रमणी भाग १—डा० राजवली पाण्डेय १५)
१९. प्रमाणवार्तिकान्तर्गत स्वार्थानुमान परिच्छेद—
आचार्य धर्म कीर्ति दलसुखभाई मालवणिया १५)
२०. ब्रह्म सिद्धान्त—पं० मधुसूदन ओझा,
गिरिधर शर्मा चतुर्वेदी व्याख्या १२)
२१. सिद्धान्त शिरोमणि भाग १—श्री केदारदत्तजोशी ५)
२२. ,, ,, भाग २ ,, २०)
२३. महामना मालवीय जी के लेख और भाषण ५)
२४. संगीत प्रवेशिका भाग १ और २ (हिन्दी, संस्कृत एवं अंग्रेजी में),
प्रत्येक भाग— १)५०
२५. हिन्दी आलोचना का इतिहास—डा० रामदरश मिश्र ९)
२६. कविसमय मीमांसा—डा० विष्णुस्वरूप ९)
२७. हिन्दी काव्य की निर्गुण धारा में भक्ति—डा० श्यामसुन्दर शुक्ल ७)
कपड़े की जिल्द ८)
२८. ब्रजभाषा और ब्रजबुलि साहित्य—डा० कणिका तोमर ८)
कपड़े की जिल्द ९)
२९. संगीतराज, राणा कुम्भाकृत, संपादिका—डा० कु० प्रेमलता शर्मा ४०)
३०. छन्द स्वति वाक्—डा० वासुदेव शरण अग्रवाल १)५०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.